ईशावास्योपनिषद्

श्रीशङ्करभाष्ययुता

हिन्दी-आङ्गलानुवादयुतसरलसंस्कृतटीकासहिता च

109370
DBCL

Sanskrit Commentary by
Dr. S. Geethamony Amma
&
Dr. S. Sobhana

English Translation by
Dr. V. Vasudevan

Hindi Translation by
Prof. K. K. Krishnan Namboothiri

Parimal Sanskrit Series No. 117

ईशावास्योपनिषद्

श्रीशङ्करभाष्ययुता

हिन्दी-आङ्गलानुवादयुतसरलसंस्कृतटीकासहिता च

Sanskrit Commentary by

Dr. S. Geethamony Amma

&

Dr. S. Sobhana

(Associate Professors in Vedanta
Sree Sankaracharaya University, Kalady, Kerala)

English Translation by

Dr. V. Vasudevan

(Reader in Nyaya
Sree Sankaracharaya University, Kalady, Kerala)

Hindi Translation by

Prof. K. K. Krishnan Namboothiri

(Retd. Professor in Hindi
University College, Kerala)

LIBRARY
New Delhi

PARIMAL PUBLICATIONS
DELHI

Published by
Parimal Publications
Office : 27/28, Shakti Nagar, Delhi-110007 (India)
Retail Outlet : 22/3, Shakti Nagar, Delhi-110007 (India)
Ph. : +91-11-23845456, 47015168
e-mail : order@parimalpublication.com
url : http://www.parimalpublication.com

© **Parimal Publications**

First Edition : Year 2012

ISBN : 978-81-7110-402-4

Price : ₹ 80.00

294.12
Sh30E

[illegible]
DB[illegible]

109370-9371

Printed by
Vishal Kaushik Printers
Near G.T.B. Hospital, Jagat Puri Vistar, Delhi

शुभाशंसावचांसि

ब्रह्मविद्यापरनामधेयेन प्रथिता उपनिषदः वेदस्य चरमावयवत्वेन संग्रथिता इत्यतो वेदान्तशब्देनाप्यभिधीयन्ते, ता इमा यथायथं गुरुपरंपराभ्यधिगता शीलिताश्च सत्यः अध्येतारं ब्रह्म गमयन्ति जन्मजराद्युपद्रवृन्दं विशीर्णमातन्वन्ति संसारजीवभूता अविद्यातत्संस्कारञ्चावसादयन्तीत्यत उपनिषदो ब्रह्मविद्येति गीयन्ते। इदानीन्तनकाले असंख्या उपनिषन्नाम्ना प्रचरन्ति तास्तु नापौरुषेयाः। ईशादयो दशोपनिषदः श्रीमच्छङ्कराचार्यविरचितेन भाष्येण विभूषिता महत्वमर्हन्ति। श्वेताश्वतरोपनिषदपि शङ्कराचार्याभ्युपगता भाष्येणानुगृहीतेत्यपि श्रूयते। तद्यथाकथञ्चिदस्तु नाम।

ईशावास्योपनिषद्विषये कापि विप्रतिपत्तिर्न केनापि समुन्नीतेति तस्य प्राथम्यं प्राधान्यञ्चाभिव्यनक्ति। अष्टादशभिर्मन्त्रैर्ग्रथितेयमल्पकायापि ब्रह्मावबोधन परेत्यतः सुष्ठु अध्येया ग्राह्या च । ईशावास्यमिति पदेन समारभ्यमाणेति हेतोः ईशोपनिषदिति ईशावास्योपनिषदित्यप्यभिधीयते। ईशा वास्यम्-आच्छादनीयमिति वा ईशेन आवास्यम् ईशावास्यमिति वा तत्र अर्थविचारः प्रसक्तः। सर्वथा जगति ब्रह्मण्यध्यस्ते विद्यमानं सर्वमपि ईशावृतम्। अत एव ईश्वरस्य वासस्थानं भवति। अनेन मन्त्रेण समारब्धेयमुपनिषत् "हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये" इति प्रार्थनापुरस्सरम् "अग्ने नय सुपथा" युयोध्यस्मज्जुहुराणमेनः" सर्वपापनाशेन शोभनमार्गेण नयेति मुहुर्मुहः याचना वचनेनोपसंह्रियते।

भगवता शङ्कराचार्येण भाष्येण विभूषितापीयं न सुग्रहा जिज्ञासुभिरिति सरलां सुगमां भाषामवलम्ब्य श्रीशङ्कराचार्यसंस्कृतसर्वकलाशालायां वेदान्तप्रवाचिकाभ्यां डा. बिरुदालङ्कृताभ्यां श्रीमतीभ्यां गीतामणिशोभनाभ्यां भावार्थप्रकाशनमाकलितम्, तयोश्च आर्जवादिगुणमण्डिता शैली जिज्ञासूनां करतलामलकवत्सुस्पष्टा उपनिषदो निगूढाशयविद्योतिनी स्यादित्याशासे। अस्मिन्नवसरे श्रीनारायणगुरुदेवेन ईशावास्यकृतं कैरली विवर्त्तनमपि स्मृतिपथमायाति। श्रीमतीभ्यां कृता अद्वैतसिद्धान्तानुसारिणीयं व्याख्या

छात्राणामन्येषाञ्चमहते उपकाराय कल्पताम्। अन्या अप्युपनिषदः सरण्या अनया व्याख्याय सारस्वतसेवामिमे निरन्तरमनुष्ठेयास्तामिति शुभाशंसया व्याख्यामिमां तत्त्वमधिजिगांसमानानां पुरत अवतारयत्ययं जनः।

विद्वज्जनसेवासमासक्तः
प्रो.आर. वासुदेवन् पोट्टि
सेवानिवृत्तो वेदान्ताचार्यः
शिवधामम्
तिरुवनन्तपुरम्

०१.१०.२०११
श्रीकण्ठेश्वरम्, तिरुवनन्तपुरम्

प्राक्कथनम्

वैदिककालिकानां सर्वविज्ञानानां समुच्चयो भवन्ति वेदाः। एकैकस्यापि वेदस्य संहिता-ब्राह्मण-आरण्यकोपनिषद्भेदेन चत्वारो भागाः सन्ति। प्रापञ्चिकशक्तीनां देवतात्वं परिकल्प्य स्तुति रूपा भवन्ति प्रायेण संहिताः। ब्राह्मणेषु आचारानुष्ठानानि, जीवनक्रमश्च विव्रियन्ते। आराधनासंप्रदायाः, उपासनानि च आरण्यकेषु विहितानि। जीवनस्य परमलक्ष्यं, जीवेश्वरजगतां स्वरूपं, परस्परबन्धः इत्येवमादीनां शास्त्रीयविचाराः उपनिषत्सु विद्यन्ते। वेदः कर्मकाण्डः, उपासनाकाण्डः, ज्ञानकाण्ड इति त्रिधा विभक्तः। संहिताब्राह्मणे कर्मकाण्डे, आरण्यकम् उपासनाकाण्डे, उपनिषदः ज्ञानकाण्डे च निहिताः। भारतीयतत्त्वचिन्तायाः अत्युन्नतश्रृङ्गत्वेन लोके आविर्भूतः प्रथमः आध्यात्मिकग्रन्थश्च भवति उपनिषत्। वेदानां अन्तः अथवा अग्र्यो भागः भवति उपनिषत्। अतः वेदान्त इति संज्ञा। वेदानाम् अन्वेषणं, लक्ष्यं, निगमनञ्च अस्यामन्तर्भवति।

उपनिषदां स्वभावं, प्रभावञ्च ज्ञातुं, प्रथमं तत्पदस्य निष्पत्तिः वाच्यार्थश्च अवगन्तव्यः। उप निषीदति इति उपनिषत्। गुरोः समीपे अधोनिषीदति इति। एवं गुरोः समीपमुपविश्य अध्ययनं कुर्वाणस्य शिष्यस्य चित्रं ददाति उपनिषत्पदम्। सद् विशरण-गत्यवसादनेषु इति धातोः उप, नि-इत्युपसर्गपूर्वकात् क्विप् प्रत्यये निष्पन्नं रूपं भवति उपनिषत्। ‘सद्’ धातोः पूर्वोक्तार्थत्रयस्वीकारेऽपि ब्रह्मविद्या इत्येव अर्थविवक्षा इति भाष्यकारेण श्रीशङ्करेण निर्धारितम्। ‘विशरणम्’ इति पदस्य नाश इत्यर्थः। यां विद्यां उपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति, तेषां अविद्यादेः संसारबीजस्य विशरणात् विनाशनात् इत्यर्थयोगेन विद्या उपनिषदुच्यते। गति पदस्य प्राप्तिः इत्यर्थः। यया विद्यया ब्रह्मप्राप्तिर्भवति सा विद्या उपनिषत्। मुमुक्षून् परं ब्रह्म गमयतीति च ब्रह्म गमयितृत्वेन योगात् ब्रह्मविद्या उपनिषत्। ‘अवसादन’ पदस्य क्षपणमित्यर्थः। यया विद्यया संसारबीजभूताविद्यासंस्कारस्य क्षपणं भवति सा विद्या उपनिषत्। भाष्यकारेण कठ-मुण्डक-बृहदारण्यकानां उपोद्घातभाष्येषु तथा

छान्दोग्ये, केनोपनिषदि चैतत् प्रतिपादितम्। एवं उपनिषच्छब्दस्य मुख्यया वृत्या विद्या इत्यर्थः, गौणार्थे तु ग्रन्थ इत्यपि; तादर्थ्यात् ताच्छब्द्यमिति न्यायात्।

चतुर्वेदान्तर्गताः ११८० उपनिषदः सन्तीति मुक्तिकोपनिषदि उक्तम्। तासु अष्टोत्तरशतं मुख्या इति तत्रैव उक्तम्।

सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्।
सकृत् श्रवणमात्रेण सर्वाघौघविकृन्तनम् (मुक्तिक-१-४४)

तासु अष्टोत्तरशतोपनिषत्सु दशोपनिषदः ऋग्वेदीयाः, एकोनविंशतिः शुक्लयजुर्वेदीयाः, षोडश सामवेदीयाः, एकत्रिंशत् अथर्ववेदीया इति ज्ञायते। तासु विषयप्रतिपादनदृष्ट्या त्रयोदश एव प्राचीनतमाः इति वक्तुं शक्यते। प्राचीनोपनिषदः बुद्धात् प्राग्भवा इति प्रायेण सर्वेषाम् आधुनिकपण्डितानां मतम्।

उपनिषत्सु दर्शनानां सर्वेषामपि बीजानि निहितानि उपलभ्यन्ते। श्रीशङ्करः स्वभाष्येण अद्वैतं, श्रीरामानुजानुगाः विशिष्टाद्वैतं, मध्वाचार्यो द्वैतं च सोपपत्ति प्रत्यपादयन्। आचार्यैः स्वसिद्धान्तप्रतिष्ठापिकाः श्रुतयः तत्परत्वेन स्वीकृताः, अन्यासां श्रुतीनां गौणत्वं चोपपादितम्। तासु न केवलं आस्तिकदर्शनानां अपि तु नास्तिकदर्शनानामपि सूचकाः उपलभ्यन्ते।

एताः प्रायेण सर्वासु भारतीयभाषासु विवर्त्तिता वर्तन्ते। (हिन्दी, बंगाली, गुजरात्ती, मरात्ती, कन्नटा तेलुङ्गु, तमिल् मलयालञ्च)। विदेशीयास्वपि भाषासु बाहुल्येन विवर्तिताः इमा इति वैदिकमुपनिषत्साहित्यं भारतीयानां विदेशीयानां तत्त्वचिन्ताधाराया मूलस्रोतस्त्वेनाभ्युपगतम्। आङ्गल, जेर्मन्, फ्रेञ्च्, इट्टालियन्, टच्च्, पोलिष्, जापानिस्, रष्यन् च। (Life in the Upanisads, Shubhra Sarma, Page.20) भारतीयाध्यात्मसाहित्यस्य, धार्मिकजीवनस्य च अमूल्यनिधिरिवाभान्ति उपनिषदः। तासां ह्युपनिषद्रत्नानां दिव्यया आभया भारते बहवः महात्मानः विविधेषु कोणेषु प्रभां प्रसारयन्तो विराजन्ते। तेषु महात्मसु मुख्याः भवन्ति राजराम् मोहन् राय्, दयानन्दसरस्वती, विवेकानन्दस्वामी, महात्मागाँधी, श्री अरविन्दः, बालगंगाधरतिलकः, श्री राजगोपालाचारी, डोक्टर एस् राधाकृष्णन् च नामग्राहं ग्राह्याः। विशिष्य केरलेषु श्रीनारायणगुरुदेवः, श्रीचट्टम्पिस्वामी, श्रीवाग्भडानन्दः, श्रीब्रह्मानन्दशिवयोगी च उपनिषत्तत्त्वप्रभाविताः समाजसेवानिरता आसन्। तैः उपनिषत्तत्त्वं न केवलं आध्यात्मिकौन्नत्यर्थं अपि तु भौतिकसमाजसमन्वयाय च समायोजितम्।

उपनिषत्तत्त्वम्।

आदिमतत्त्वचिन्ता भवति उपनिषत्सूपलभ्यमाना। मनुष्याणां मौलिकप्रश्नानां उत्तराणां च स्वरूपम् उपनिषत्सु द्रष्टुं शक्यते। एकत्वदर्शनम् उपनिषदः मुख्यः सन्देशः। सर्वान् देवान् च एकस्मिन् ब्रह्मणि प्रविलाप्य, भारते एक एव देव इति व्यवस्थापितम्। तदेकं सत्यं भवति ब्रह्म। तत्तु सच्चिदानन्दस्वरूपं भवति। तदेकमेव मायया नानेव भाति। स्वस्वरूपाखण्डज्ञानेनैव नानात्वनिवृत्तिः, तदर्थं उपायभूताः भवन्ति प्रतिमाः, प्रतीकानि, अन्योपाधयश्च। अद्वैतसत्यसाक्षात्कार एव मनुष्याणां आत्यन्तिकजीवनलक्ष्यम्। पुनरावृत्तिरहिततत्परमपदप्रतिपादिका भवन्ति सर्वा उपनिषदः। सर्वप्रापञ्चिकप्रतिभासानां आधारभूतं ब्रह्मैव उपाधिपरिच्छिन्नत्वेन मनुष्यशरीरेषु जीवात्मरूपेण प्रकाशते। मायाशक्त्या नानात्वेन प्रतिभासमानम् इदं सर्वं स्वात्मैवेति साक्षात्करोति। अयमेव अर्थः सर्वोपनिषत्सारभूतेषु चतुर्षु महावाक्येषु उद्घोषितः। यथा-तत्त्वमसि, अयमात्मा ब्रह्म, प्रज्ञानं ब्रह्म, अहं ब्रह्मास्मि।

ईशावास्योपनिषत्।

शुक्लयजुर्वेदस्य वाजसनेयसंहितायां चत्वारिंशत्तमे अध्याये अन्तर्भूता इयमुपनिषत्। संहितान्तर्भूता इयं एका एव। अतः 'संहितोपनिषदि'ति नाम्नि अपि ज्ञायते। अस्यां अष्टादश मन्त्राः सन्ति। एता अष्टादशश्रुतयः भगवद्गीतायाः अष्टादशाध्यायानां प्रतिनिधानं कुर्वन्ति। सर्वोपनिषदां दार्शनिकतत्त्वानि अस्यां संक्षेपेण प्रतिपाद्यन्ते। अतः आकारेण ह्रस्वाऽपि प्रथमा, प्राचीना, प्रमुखा च इयं उपनिषत्। अस्याः प्रथमं व्याख्यानं श्रीशङ्कराचार्येण प्रणीतं भवति। (788 A.D-820) ततः पश्चात्कालिकैः सांप्रदायिकाचार्यैः अपि व्याख्यानानि विरचितानि सन्ति। तेषु व्याख्यातृषु प्रमुखाः भवन्ति- आनन्दगिरिः, ब्रह्मानन्दः, शङ्करानन्दः, रामचन्द्रपण्डितः, आनन्दभट्टोपाध्यायः, महीधरः, उवठः च। Dr. S.Radhakrishnan, Paul Duessan, A.O. Hume, Roa आदिभिः आधुनिक पण्डितैरपि शाङ्करभाष्यस्य आङ्गलभाषानुवादोऽपि रचितः।

छन्दोबद्धा इयं छान्दोग्यादीनां रचनोत्तरमेव रचितेति प्रायेण सर्वेषां आधुनिकपण्डितानां अभिप्रायः। क्रिस्त्वब्दे सप्तमशतकाब्दे एव अस्याः रचनाकाल इति तेषां मतम्। यजुस्संहिता शुक्ल-कृष्णभेदेन द्विधा। याज्ञवल्क्यसंबन्धिनी यजुःसंहिता वाजसनेयिशाखा, अयमेव शुक्लयजुर्वेदः। अस्मिन् चत्वारिंशत् अध्यायाः सन्ति। आद्याः नवत्रिंशदध्यायाः कर्मकाण्डीयाः। अश्वमेधपर्यन्ताः अनेके यज्ञाः प्रतिपादिताः दृश्यन्ते। चत्वारिंशः अध्यायः यज्ञकर्मनिरपेक्षः ब्रह्मविद्याप्रतिपादको ज्ञानकाण्ड एव। अस्मिन् अष्टादश मन्त्राः सन्ति। ते एव ईशावास्योपनिषत्। ईशावास्यं 'वाजसनेय्युपनिषत् इति नाम्ना प्रथामलभन्त। अस्यां द्वौ पाठौ स्तः-काण्व-माध्यन्दिनौ। काण्वपाठ एव श्रीशङ्कराचार्यैः भाष्यरचनार्थं स्वीक्रियते। आकारेण अतीवह्रस्वा इयमुपनिषत् गहनार्थयुक्ता दुर्ग्रहा च भवति। तारतम्यमतशास्त्रज्ञेन बौक्केन अस्याः दुर्ग्रहता गहनता च दर्शिता। (sacred Books of the world II, P.133) अतिरम्यासु उपनिषत्सु अन्यतमा इयमिति T.M.P. महादेवेनाप्युक्तम्। अस्याः सविशेषार्थमहिमा अस्तीति स्वामिना रंगनाथानन्देन च प्रोक्तम् (The Upanisads-sections p-1) हिन्दुधर्मस्य परमसारभूता इयमुपनिषदिति महात्मजिना यदभिप्रेतं तत् अस्याः महत्वं सूचयति- "सर्वासां उपनिषदां अन्यासां श्रुतीनां च सपदि भस्मीकरणेऽपि ईशोपनिषदः प्रथममन्त्रः हैन्दवानां मनसि अवशिष्येत चेत् हिन्दुमतं चिरं स्थास्यति"। (The collected works. Vol. LXIV, P.259)

जीवनस्य, प्रपञ्चस्य च मध्ये, मिथः च वैरुद्ध्यान्येव मनुजं तत्त्वचिन्तां प्रति नयन्ति। तत्त्वचिन्तायाः लक्ष्यं वैरुद्ध्यानां समन्वय एव। उपनिषत्सु अत्यन्तं तत्त्वचिन्तात्मिका इयमुपदिषत्। चिदचित्स्वरूपस्य जगतः परमात्माधीन-स्थित्यादिमत्वं, आदेहपातं यथाशक्ति कर्मयोगस्य अनुष्ठेयत्वं, अविदुषां निन्दनं, परमात्मनः सोपाधिक-निरुपाधिकस्वरूपनिरूपणञ्च संगृहीतम्।

प्रथममन्त्रे ब्रह्मैव सत्यं, ब्रह्मणोऽतिरिक्तसत्ता प्रपञ्चस्य नास्ति, जगति सर्वं ब्रह्मणा आच्छादितम्। अतः भौतिकेष्वास्थां त्यक्त्वा कामकाञ्चनादित्यागपूर्वकं ज्ञाननिष्ठाया अनुवर्त्तनाय उपदिशति। द्वितीये ज्ञाननिष्ठायां असमर्थः साधकः शास्त्रविहितरीत्या कर्माणि कुर्यादित्युपदिशति, स एव कर्मयोगः। तृतीयमन्त्रे पूर्वोक्तमार्गद्वयावलम्बिनां स्वोच्छाचारिणां आत्मघ्नानां संसारप्राप्तिरेव फलम् इत्युपदिशति। चतुर्थादारभ्य अष्टमपर्यन्तं आत्मनः स्वरूप-तटस्थलक्षणानि विवृतानि। तत्रैव आत्मज्ञानिनः स्वभावं, सर्वात्मभावं, शोकमोहाद्यतीतत्त्वं च स्फुटं प्रतिपादयति। नवमादारभ्य चतुर्दशपर्यन्तं ज्ञानमार्गे असमर्थानां कृते विरचितानि भवन्ति। अन्तिमाः चत्वारो मन्त्राः साधकस्य मृतिकालप्रार्थनारूपाः भवन्ति।

आङ्गल-हिन्दी भाषानुवादोपेता ईशावास्योपनिषत्- शाङ्करभाष्यानुसारिणी सरलसंस्कृतव्याख्या विद्वत्समक्षं समर्प्यते। अत्र सरलसंस्कृतव्याख्या डा. एस्. गीतामणि अम्मा & डा. एस् शोभना इति आभ्यां रचिता। हिन्दी भाषानुवादः प्रो. के. के. कृष्णन् नम्बूतिरि महाभागेन, आङ्गलभाषानुवादः डा. वि. वासुदेवन् महाभागेन च विहितः। अस्मिन् यत्ने साहाय्यं कृतवतां सर्वेषां कृते कृतज्ञाः भवामः। अस्य ग्रन्थस्य शोधनं कृत्वा शुभाशयवचनरूपं च आचार्यवर्येण प्रोफसर् . आर्. वासुदेवन् पोट्टि महोदयेन यद्विलिखितं तदस्य ग्रन्थस्य ललाटलिखितं तिलकमस्ति। ग्रन्थस्य अस्य प्रकाशनं कृतवतां परिमल् पब्लिकेषन् मुद्रणाधिकारिणां कृते कृतज्ञतां समर्पयामः।

डा. एस्. गीतामणि अम्मा & डा. एस्. शोभना।
डा. के.के. कृष्णन् नम्बूतिरि & डा. वि. वासुदेवन्।

ईशावास्योपनिषद्

शान्तिपाठः

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः शान्तिः शान्तिः।

अस्या उपनिषदः आरम्भे अन्ते च पूर्णमद इत्यादि मन्त्रः शान्त्यर्थत्वेन पठ्यते। तदर्थश्च-अदः परोक्षं ब्रह्म पूर्णम् त्रिविधपरिच्छेदरहितम्। इदं शरीराद्युपाधिपरिच्छिन्नं ब्रह्म पूर्णं स्वेन रूपेण, न तु उपाधिपरिच्छिन्नेन । इदं पूर्णं पूर्णात् परमात्मन एव उद्गच्छति। उपाध्युद्भवेन उद्भवति, पूर्णस्य कार्यात्मनः पूर्णत्वमादाय अविद्याकृतोपाधिपरिच्छेदं तिरस्कृत्य पूर्णमेव केवलं ब्रह्मावशिष्यते इत्यर्थः।।

इस उपनिषद् के आरंभ और अन्त में 'ओं पूर्णमदः' इत्यादि मंत्र शान्तिपाठ रूप से पढा जाता है। मंत्र का अर्थ इसप्रकार है अदः अर्थात् परोक्ष ब्रह्म याने त्रिविध परिच्छेदों से रहित ब्रह्म पूर्ण है। शरीर आदि उपाधि परिच्छिन्न यह ब्रह्म भी पूर्ण है अपने ही रूप से; न कि उपाधि परिच्छिन्न रूप से। इस पूर्ण ब्रह्म का उदगमन भी पूर्ण परमात्मा रूप से होता है। उपाधि के उद्भव से उद्भव होता है पूर्ण कार्यात्मा से पूर्णत्वनिकाल लेने पर अविद्याकृत उपाधि के परिच्छेद का तिरस्कार करके केवल पूर्ण ब्रह्म ही शेष रहता है।

Santhi Mantra (sacred verse of peace) is recited at the commencement and the end of this Upanishad. The verse-'poornamadah…' is very famous and it means as follows:- "That (transcendent Brahman) is full; This (immanent Brahman) is full (in its original form); The full (immanent) comes out of the full (transcendent); Taking the full from the full, the full itself (pure self itself) remains. Om. Peace; peace, peace."

श्लोकः-१

ॐ ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।।१।।

अस्मिन् लोके यत् किञ्च अनित्यं (विकारभूतं) वस्तु अस्ति, चराचरात्मकं इदं सर्वं परमात्मना आच्छादनीयम्। तेन कारणेन त्यागेन आत्मा रक्षितव्यः। कस्यापि (परस्य स्वस्य वा) धनं मा काङ्क्षीः।

इस लोक में जो कुछ अनित्य (परिवर्तित होने वाला) है, चराचरात्मक यह सब बाहर-भीतर परमात्मा द्वारा अभिव्याप्य है। इस कारण त्यागपूर्वक अपनी अर्थात् अपने जीवन की रक्षा करनी चाहिए। किसी की भी (अपनी या पराई) संपत्ति की इच्छा नहीं करनी चाहिए।

All that exists in the world should be covered over by the sole Reality, which is the ruler of all. By that renunciation of the world, one should protect his soul (from bondage). Do not be greedy for anybody's wealth.

शाङ्करभाष्यम्

ईशावास्यमित्यादौ मन्त्राः कर्मस्वविनियुक्ताः। तेषामकर्मशेषस्यात्मनो याथात्म्यप्रकाशत्वात्। याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वसर्वगतत्त्वादि वक्ष्यमाणम्। तच्च कर्मणा विरुध्येतेति युक्त एवैषां कर्मस्वविनियोगः।

न ह्येवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं कर्तृभोक्तृरूपं वा येन कर्मशेषता स्यात्। सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैव उपक्षयात्। गीतानां मोक्षधर्माणां चैवंपरत्वात्। तस्मादात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादि चाशुद्धत्वपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि। योहि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनादृष्टेन स्वर्गादिना च द्विजातिरहं न काणकुब्जत्वाद्यनधिकारप्रयोजकधर्मवानित्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति ह्यधिकारविदो वदन्ति।

तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशनेन आत्मविषयं स्वाभाविकमज्ञानं निवर्तयन्तः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयन्ति। इत्येवमुक्ताधिकार्यभिधेयसम्बन्धप्रयोजनान्मन्त्रा न्संक्षेपतो व्याख्यास्यामः।

ईशा ईष्ट इतीट् तेनेशा। ईशिता परमेश्वरः परमात्मा सर्वस्य। स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन्प्रत्यगात्मतया तेन स्वेन रूपेणात्मनेशावास्यमाच्छादनीयम्।

किम्? इदं सर्वं यत्किञ्च यत्किञ्चिज्जगत्यां पृथिव्यां जगत्तत्सर्वं स्वेनात्मना ईशेन प्रत्यगात्मतयाहमेवेदं सर्वमिति परमार्थसत्यरूपेणानृतमिदं सर्वं चराचरमाच्छादनीयं स्वेन परमात्मना।

यथा चन्दनागर्वादेरुदकादिसम्बन्धजक्लेदादिजमौपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेन आच्छाद्यते स्वेन पारमार्थिकेन गन्धेन। तद्वदेव हि स्वात्मनि अध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगद्द्वैतरूपं जगत्यां पृथिव्याम्, जगत्यामिति उपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्।

एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो न कर्मसु। तेन त्यक्तेन त्यागेनेत्यर्थः। न हि त्यक्तो मृतः पुत्रो वा भृत्यो वा आत्मसम्बन्धिताया अभावाद् आत्मानं पालयति। अतस्त्यागेन इत्ययमेव वेदार्थः। भुञ्जीथाः पालयेथाः।

एवं त्यक्तैषणस्त्वं मा गृधः, गृधिमाकाङ्क्षां मा कार्षीर्धनविषयाम्। कस्यस्विद्धनं कस्यचित्परस्य स्वस्य वा धनं मा काङ्क्षीरित्यर्थः। स्विदित्यनर्थको निपातः।

अथवा मा गृधः। कस्मात्? कस्यस्विद्धनमित्याक्षेपार्थो न कस्यचिद्धनमस्ति यद्गृध्येत। आत्मैवेदं सर्वमितीश्वरभावनया सर्वं त्यक्तमत आत्मन एवेदं सर्वमात्मैव च सर्वमतो मिथ्याविषयां गृधिं मा कार्षीरित्यर्थः।

सरलसंस्कृतव्याख्या

ईशावास्यस्य प्रथममन्त्रः परममहनीयो भवति। अस्य मन्त्रस्य पूर्वार्धेन तत्त्वोपदेशः। तृतीयपादेन अपरिपक्वज्ञानस्य संन्यासविधिः, चतुर्थपादेन संन्यासिनो नियमविधिश्च उक्तः। अस्मिन् मन्त्रे ईश् धातोः निष्पन्नस्य ईश इति पदस्य सर्वस्य ईशिता परमात्मा इत्यर्थः। 'वास्यम्' इति पदं न केवलमस्य

मन्त्रस्य, अस्या उपनिषद एव परमप्रधानं भवति। 'वस्' धातोः अनेकार्थत्वेऽपि अद्वैतानुरोधेन श्रीशङ्कराचार्येण 'आच्छादनीयम्' इत्यर्थ एव स्वीकृतः। जगद्रूपेण भासमानं सर्वं अन्तर्बहिश्च ईशेन पूर्णं (व्याप्तम्)। जगतः परमकारणं ईश्वरः भवति। स एव आत्यन्तिकसत्यम्। इदं जगत् उत्पत्ति-स्थिति-लयपूर्वकं भवति। यस्माद् जगदुत्पद्यते, यदाश्रित्य जीवति, यस्मिन्नेव च लीयते तत् परमकारणं ब्रह्म भवति। तदुक्तं तैत्तिरीयकोपनिषदि "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म"इति। (III-1-1) परमकारणं अजं भवति। अन्यथा तस्यापि कारणत्वे तदेव परमकारणं स्यात्। तथा देशकालाद्यपरिच्छिन्नत्वात् अजं, तस्मात् अमरञ्च। अजत्वात् अमरत्वाच्च अनाद्यनन्तम्, अनाद्यनन्तत्त्वात् सर्वव्यापकं भवति, ततो न वस्त्वन्तरमस्ति। प्रपञ्चस्य परमकारणान्वेषणमेव सत्यान्वेषणम्। एवं चलनात्मकेऽस्मिन् प्रपञ्चे चराचरात्मकं सर्वं स्वेन परमात्मना आच्छादनीयम् भवति। यथा चन्दनस्य उदकादिसंबन्धजं दुर्गन्धादिकं (मालिन्यादिकं) स्वेन पारमार्थिकेन सुगन्धेन आच्छाद्यते। तथा ध्यानादिना स्वस्वरूपज्ञाने सति नामरूपात्मकमिदं जगत् प्रत्यगात्मा एवेति विज्ञायते।

'तेन त्यक्तेन भुञ्जीथा' इत्यनेन द्वितीयपादेन निष्कामकर्मानुष्ठानमेव विधीयते। अयमेव कर्ममार्गः। एषणात्रयसंन्यासपूर्वककर्मानुष्ठानमेव निष्कामकर्म। एषणात्रयं नाम दारैषणा, वित्तैषणा, पुत्रैषणा च। त्यक्तैषणः परस्य स्वस्य वा धनविषयां आकांक्षां न करोति। अथवा आत्मैवेदं सर्वमिति सर्वात्मभावनया त्यक्तैषणस्य आत्मन एवेदं सर्वं आत्मैव च सर्वं इत्यतः मिथ्याविषयासक्तिः न कार्या। एवं एषणात्रयसंन्यासेन आत्मज्ञाननिष्ठया आत्मा रक्षितव्यः। तत्त्वतः ईश्वरात्मकमेव सर्वं, भ्रान्त्या यद् अनीश्वररूपेण गृहीतं तत्सर्वं ईश्वर एव आत्मैवेति। तत्त्वमसि महावाक्यवत् सर्वात्मक ईश्वरोऽस्मि इति भावनीयम् इत्यस्य मन्त्रस्य तत्त्वोपदेशः।

अत्यासक्तिरेव आधुनिकलोकस्य समस्तमण्डलेषु (विद्याभ्यास-कर्म-व्यवसाय-सांस्कारिकेषु) मूल्यच्युतेः कारणम्। सर्वे आधुनिकाः जनाः केवलं भौतिकाभिवृद्धिं पुरस्कृत्य प्रवृत्ताः। तस्मात् ईशावास्यमिदं सर्वं इति सन्देशः। तेन स्वस्वकर्तव्येषु यथावत् चरितुं एकीभावभावनया मनुष्येषु इतरप्राणिषु च स्नेहादरान् प्रदर्शयितुं च समर्थो भवति मानवः। सर्वेऽपि आत्मैवेत्यर्थः। तथा च न कश्चित् द्वेष्योऽस्तीति भावः।।

हिन्दी व्याख्या

ईशावास्योपनिषत् का प्रथम मंत्र परम महनीय है। इस मंत्र का पूर्वार्द्ध तत्त्वोपदेश है। तीसरे चरण से अपरिपक्वज्ञान के परित्याग की बात तथा चौथे चरण से संन्यासी की नियमविधि बतायी गयी है। इस मंत्र में ईश्, धातु से निष्पन्न ईश् शब्द का अर्थ होता है सर्वस्व का अधीश्वर परमात्मा। वास्यम् केवल इस मंत्र का ही नहीं अपि तु इस उपनिषद् का ही परम प्रधान शब्द है। 'वस्' धातु अनेकार्थ वाची होने पर भी श्री शंकराचार्य द्वारा अद्वैत सिद्धान्त के अनुकूल 'आच्छादनीय' ऐसा अर्थ ही स्वीकृत किया गया है। जगत् के रूप में प्रतीयमान इसके भीतर और बाहर सब-कहीं परमेश्वर से परिपूर्ण या अभिव्याप्त है। जगत् का परम कारण ब्रह्म है। वही आत्यन्तिक सत्य है। यह जगत् उत्पत्ति स्थिति एवं लय से युक्त है। जिसमें से जगत् की उत्पत्ति होती है, जिसके आश्रय से जीवित रहता है जिसमें ही लय प्राप्त करता है, वही परम कारण ब्रह्म है। तैत्तीरीयोपनिषद् में यह कहा भी गया है 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व, तद् ब्रह्म।' -"(जिसमें से ये सारे भूत उत्पन्न होते हैं जिस में जीवित रहते हैं और अन्त में नाशोन्मुख होकर जिसमें लय प्राप्त होते हैं उसे भली भांति जानने की इच्छा करो, वही ब्रह्म है।) परम कारण अज होता है। अन्यथा उसका भी कारण होने पर वही परम कारण हो जाय। वैसे देश-काल आदि के अपरिच्छिन्न होने से वह अज होता है और उसी से अमर भी। अजत्व और अमरत्व से वह अनाद्यन्त है। अनाद्यनन्तत्त्व के कारण वह सर्वव्यापक होता है और उसी से वहाँ दूसरी वस्तु का अस्तित्त्व नहीं हो सकता। प्रपंच के परमकारण का अन्वेषण ही सत्यान्वेषण है। इस प्रकार इस चलनात्मक प्रपंच के सब चराचरात्मक पदार्थ स्वयं परमात्मा द्वारा आच्छादनीय होते हैं। जैसे चंदन के साथ लगे मलिन जल आदि के सबन्ध से जनित दुर्गन्ध आदि (मालिन्य आदि) चन्दन की अपनी ही यथार्थ सुगन्ध से आच्छादित होती है वैसे ही ध्यानादि से अपने स्वरूप को पहचान लिये जाने पर नामरूपात्मक यह

जगत् अपना ही अन्तर्यामी परमात्मा मालूम हो जायगा।

'तेन त्यक्तेन भुञ्जीथाः' यही द्वितीय पाद है। इससे निष्काम कर्म का ही उपदेश दिया जाता है। यही कर्म-मार्ग है। तीनों एषणाओं के परित्याग के साथ किये जानेवाले कर्म का अनुष्ठान ही निष्काम-कर्म होता है। दारैषणा, वित्तैषणा एवं पुत्रैषणा - इन तीनों को एषण-त्रय कहा जाता है। एषणाओं को परित्याग किया हुआ व्यक्ति परायी अथवा अपनी धनसंबन्धी आकांक्षा नहीं करता। अथवा यह सब आत्मा ही है सर्वात्म-भावना से त्यक्त-एषणवाले की आत्मा का ही यह सर्वस्व है, आत्मा ही सर्वस्व है अतः मिथ्या-परक विषयों की आसक्ति नहीं करनी चाहिए। इस प्रकार एषणात्रय के परित्याग एवं आत्मज्ञान की निष्ठा से अपनी रक्षा करनी चाहिए। तत्त्व दृष्टि से सब ईश्वरात्मक है। भ्रम से जो अनीश्वर रूप से ग्रहण किया जाता है वह सब ईश्वर ही है, आत्मा ही है। 'तत्त्वमसि' जैसे महावाक्य के समान सर्वात्मक ईश्वर ही मैं हूँ, ऐसा भावन करना चाहिए, यही इस मंत्र का तत्त्वोपदेश है। अति आसक्ति ही आधुनिक जगत के समस्त मण्डलों (जैसे विद्याभ्यास विषयक, कार्मिक व्यावसायिक सांस्कारिक आदि) की मूल्यच्युति का कारण है। सारे आधुनिक लोग केवल भौतिक अभिवृद्धि को लक्ष्य करके प्रयत्नशील हैं। अतः 'ईशावास्यं इदं सर्वं' के सन्देश द्वारा सब व्यक्ति अपने-अपने कर्तव्यों में यथावत् प्रवृत्त होने तथा एकत्व की भावना से दूसरे मनुष्य और अन्य प्राणियों के प्रति स्नेह और आदर प्रकट करने में समर्थ होते हैं। सारे आत्मरूप हैं, यही तात्पर्य है, यहाँ किसी से भी द्वेष नहीं किया जा सकता।

English Translation

In Isavasya Upanisad the first verse itself is very glorious. The first half of the verse expounds very effectively, the nature of Brahman. The second half declares the means to spiritual perfection. They are renunciation and desirelessness, said in third and fourth (last) lines respectively.

The term "Isa vasyam" is the heart of not only this verse but of the entire Upanishad. The word 'Isa', derived

from the root 'Is' (ईश्) denotes lord, the ruler of universe. 'vasyam' derived from the root 'vas' has several meanings. According to Advaita, SriSankara takes the meanings of "to be covered by". All that exists in the world should be covered over with one's own self. Everything is pervaded by Brahman; He, the Lord is Supreme Reality.

The world enjoys origination, sustenance and destruction and He, the Lord is the ultimate reason, who administers all these. Taittiriya upanishad says-Brahman is that from which all these beings are born, on account of which all these are sustained and into which all these are withdrawn.

The supreme Reason is not a created one; otherwise, it could not be supreme. It is free from all the limitations of place, time and particular substantial nature. It is eternal, i.e; free from construction and destruction. Just as sandalwood, with its sweet smell covers the bad smell of decaying matter in water, so also contemplation on the one real self removes the unreal world of diverse names and forms.

Performing work without attachment is advised in the third line (quarter). This is the path of action. One is advised to give up all the three kinds of desire, desire for spouse, wealth and children and to enjoy them. Then he would not be lusty to grab a little more from another's share. By seeing God in everything, he should renounce the pretty world by desires and protect his soul from bondage and misery.

Bondage is due to the unreal view of plurality and that can be destroyed only by the knowledge, derived from scriptural texts like "Tat Tvam Asi" and others. This first verse also reflects the same idea of "Tat Tvam Asi" i.e.,

"God pervades everything."

Over attachment is the main reason for the vanishing value in every field (of education, i.e, culture etc.). Nowadays selfishness and worldly desires are placed before universal brotherhood and oneness. We can derive from the message that God pervades everything, the doctrine of equality of all creatures on the earth, which leads us for a life of love and kindness towards fellow creatures, without any hatred or anger.

श्लोकः-२

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।२।।

अस्मिन् लोके कर्माणि निर्वर्तयन्नेव (अग्निहोत्रादीनि) शतसंख्याकान् संवत्सरान् जीवितुं इच्छेत्। एवं प्रकारेण, नरमात्राभिमानिनि त्वयि, कर्मफलं न लिप्यते, एतस्मात् प्रकारान्तरं नास्ति।

इस लोक में (अग्निहेत्रादिक) कर्मों से विरत हुए विना अर्थात् कर्मों को करते हुए ही सौ वर्ष जीवित रहने की अभिलाषा करनी चाहिए। ऐसा करने से मात्र मनुष्य रूप तुम्हें कर्मफल बाधित नहीं होते। इस से अलग और कोई मार्ग नहीं है।

Simply performing sacrificial works, one should wish to live hundred years. There is no otherway for you (the man of desires and action) whereby that action shall not contaminate you.

शाङ्करभाष्यम्

एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनात्मज्ञाननिष्ठतयात्मा रक्षितव्य इत्येष वेदार्थः। अथ इतरस्यानात्मज्ञतया आत्मग्रहणाय अशक्तस्येदमुपदिशति मन्त्रः।

कुर्वन्नेव इह निर्वर्तयन्नेव कर्माण्यग्निहोत्रादीनि जिजीविषेज्जीवितुमिच्छेच्छतं शतसङ्ख्याकाः समाः संवत्सरान्। तावद्धि पुरुषस्य परमायुर्निरूपितम्। तथा च प्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत् कुर्वन्नेव कर्माणीत्येतद्विधीयते।

एवम्प्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानिनीत एतस्मादग्निहोत्रादीनि कर्माणि कुर्वतो वर्तमानात्प्रकारादन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्म न लिप्यते कर्मणा न लिप्यत इत्यर्थः। अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत्। कथं पुनरिदमवगम्यते पूर्वेण संन्यासिनो ज्ञाननिष्ठोक्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेति। उच्यते; ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्यं यथोक्तं न स्मरसि किम्। इहाप्युक्तं 'यो हि जिजीविषेत् स कर्म कुर्वन्' 'ईशावास्यमिदं सर्वं' 'तेन त्यक्तेन भुञ्जीथाः' 'मा गृधः कस्यस्विद्धनम्' इति च। न जीविते मरणे वा गृधिं कुर्वीतारण्यमियादिति

च पदम्; ततो न पुनरियात् इति संन्यासशासनात्। उभयोः फलभेदं च वक्ष्यति। इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः क्रियापथश्चैव पुरस्तात्संन्यासश्चोत्तरेण। निवृत्तिमार्गेण एषणात्रयस्य त्यागः। तयोः संन्यासपथ एवातिरेचयति। "न्यास एवात्यरेचयत्" इति च तैत्तिरीयके।

द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः।
प्रवृत्तिलक्षणो धर्मो निवृत्तश्च विभावितः।।

इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता। विभागञ्चानयोः दर्शयिष्यामः।।

सरलसंस्कृतव्याख्या

सर्वासु उपनिषत्सु मुख्यतया प्रवृत्तिलक्षणः निवृत्तिलक्षणश्च इति द्वौ पन्थानौ निर्दिष्टौ। तत्साधयितुं आचार्यवर्येण महाभारतात् श्लोक उद्धृतः। अत्रापि तथैव। प्रथममन्त्रे निवृत्तिमार्गः उक्तः। द्वितीयमन्त्रे प्रवृत्तिमार्गमुपदिशति। कर्मयोगस्य यथावदनुष्ठाने सहायको भवति प्रथमघटकः ईश एव ब्रह्म तत् सत्यमिति विवेकः। अत्र स विवेक एव 'ईशावास्यमिदं सर्वं' इत्युक्तम्। अत एव भगवद्गीतायामपि कर्मयोगोपदेशे अर्जुनं निमित्तीकृत्य सांख्ययोगस्य उपदेशः। फलेच्छाभावे कर्मानुष्ठानं किमर्थं इत्यत्र उच्यते- कर्मनिवृत्तिरेव आत्यन्तिकलक्ष्यम्। किन्तु संसारेऽस्मिन् तन्न सुसाधम्। यतः सर्वे प्रकृत्याः गुणैः प्रेरिताः सर्वदा कर्मसु निरताः वर्तन्ते। तथा च उक्तं गीतायाम्-

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढात्मा कर्ताहमिति मन्यते।। (III-27)

तस्मात् वेदान्तदर्शनं कर्माणि न सर्वथा तिरस्करोति। कर्मयोगस्तु विहितकर्मणां निष्कामतयानुष्ठानमेव। सकामं कर्म कर्तारं तत्फलेन बध्नाति, तस्मात् स संसारे बद्ध्यते च। किन्तु निष्कामं कर्म कर्तारं न लिम्पति, अपि च चित्तशुद्धिद्वारा ज्ञानोदयं प्रति आरादुपकारकं भवति। अयमेवार्थः भगवद्गीतायामप्युच्यते-

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बद्ध्यते।। इति। (V-7)

विवेकचूडामणौ च-

चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये।
वस्तुसिद्धिर्विचारेण च किञ्चित् कर्मकोटिभिः।।

उपनिषत्काले मनुष्याणामायुः शतवर्षमासीदिति कथ्यते। एवं येन पुरुषेण स्वस्यायुः प्रवृत्तिमार्गेण नीयते, तस्य नरजन्मनः नीचजन्मप्राप्तिः न भवति। तत्त्वज्ञानाभावात् मोक्षालाभेऽपि स न सर्वथा हीयते।

सर्वदा स्वार्थमोहं विहाय सर्वैः लोकं समुद्धर्तुं कर्म कर्तव्यम्। स्वार्थमोहविहीनैः एव अन्येषां कृते यत्किञ्चित् कर्तुं शक्यते।

हिन्दी व्याख्या

सारे उपनिषदो में मुख्य रूप से प्रवृत्तिलक्षण और निवृत्तिलक्षण-ऐसे दो मार्ग वताये गये हैं। उसे साध्य करने के लिए आचार्यवर द्वारा महाभारत से एक श्लोक उद्धृत भी है। यहाँ भी वह वैसा ही है। प्रथम मंत्र से निवृत्ति मार्ग कहा गया है। द्वितीय मंत्र से प्रवृत्ति मार्ग का उपदेश किया जाता है। कर्मयोग के यथावत् अनुष्ठान में सहायक पहला घटक है ईश जो ब्रह्म या सत्य है, यह विवेक है। यहाँ वह विवेक ही 'ईशावास्यमिदं सर्वं' ऐसा कहा गया है। इस कारण से भगवद्गीता में भी अर्जुन को निमित्त बनाकर सांख्ययोग का उपदेश किया गया है। फलेच्छा के अभाव में कर्मानुष्ठान क्यों हो इस प्रश्न का उत्तर यो दिया जाता है- कर्म से निवृत्त होना ही आत्यन्तिक लक्ष्य है। किन्तु इस संसार में यह निवृत्ति आसानी से प्राप्त नहीं की जा सकती, क्योंकि सब प्रकृति के गुणों से प्रेरित होकर हमेशा कर्म में निरत हो जीवन-यापन कर रहे हैं। गीता में कहा भी गया है-

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारः विमूढात्मा कर्ताहमिति मन्यते।।

अतः वेदान्त दर्शन कर्मों का सर्वथा तिरस्कार नहीं करता। कर्मयोग तो विहित कर्मों का निष्काम भाव से अनुष्ठान करना ही है। सकाम कर्म, करनेवाले को अपने फल से बाध लेता है और फलतः वह संसार से बंध जाता है। किन्तु निष्काम कर्म, करनेवाले व्यक्ति से न लिपट जाता बल्कि

चित्तशुद्धि द्वारा ज्ञानोदय के लिए वह कहीं सहायक भी होता है। यह बात भगवद्गीता में कही भी गयी है-

“न मां कर्माणि लिम्पन्ति नमे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बद्ध्यते।।”

‘विवेक चूडामणि’ में भी ऐसा कहा हुआ है-

“चित्तस्य शुद्धये कर्म, नतु वस्तूपलब्धये।
वस्तुसिद्धिर्विचारेण न किञ्चित्कर्मकोटिभिः।।”

उर्पनिषदों के काल में मनुष्यों की आयु सौ वर्ष थी, ऐसा कहा जाता है। ऐसी स्थिति में जो व्यक्ति अपनी आयु प्रवृत्ति मार्ग से चलाता है, उसकी नीच-जन्म-प्राप्ति न होती। तत्त्वज्ञान के अभाव से मोक्ष-प्राप्ति के न होने पर भी वह सर्वथा उपेक्षित नहीं होता।

हमेशा स्वार्थमोह छोडकर सब लोगों को जगत् के उद्धार केलिए कर्म करना चाहिए। स्वार्थ-मोह-विहीनों से ही अन्य व्यक्तियों केलिए कुछ कार्य किया जा सकता है।

English Translation

Activity and inactivity are the two important paths mentioned in Upanishads. Srisankara quotes a verse from Mahabharata to prove this. The path of inactivity is presented in the first verse, and now follows the path of activity. That is why, Lord Srikrishna teaches ‘samkhya yoga’ (path of knowledge) while describing karmayoga (path of activity).

Why should a man go on performing works, though he is desireless? The answer is that, that is the only possible way. Inactivity may be the main goal, but it is impossible in this world. None can remain inactive as he is driven to action. As said in Bhagavadgita- “All actions are being performed by the three qualities of Prakrti- Sattva, Rajas and Tamas. The unwise man, deluded by egoism thinks that he is the performer.”

So, the Upanishads don’t neglect karma (action) at all. They teach karmayoga, i.e, performing works without any attachment. Works done without desire for reward will not bind the soul. It purifies the heart and makes it fit to receive the highest knowledge.

The life span of a man is hundred years.

The verse tells us not to be selfish and to lead a life of perfect dedication, a life of continual service to fellow creatures.

श्लोकः-३

असुर्या नाम ते लोका अन्धेन तमसावृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।३।।

यस्य अद्वैतानुभूतिः कर्मयोगानुष्ठानं वा नास्ति तस्य गतिः का? इत्येव मन्त्रेऽस्मिन् प्रतिपाद्यते। असुरसम्बन्धिन इति प्रसिद्धाः ते लोकाः, अज्ञानेन तमसा आच्छादिताः। येऽविद्वांसः आत्मानं नित्यं हिंसन्ति, ते आत्महनः मृतौ स्थावरान्तान् लोकान् अभिगच्छन्ति।

जिन्हें अद्वैत की अनुभूति नहीं होती अथवा जो कर्मयोग का अनुष्ठान नहीं करते, उनकी क्या गति होती है, यह बात इस मंत्र में बताई जाती है। असुरसम्बन्धी रूप से प्रसिद्ध वे लोक अज्ञान के अन्धकार से आच्छादित है। जो नादान व्यक्ति अपनी हिंसा प्रतिदिन करते रहते है, ऐसे आत्महन्ता लोग मृत्यु के पश्चात् ऐसे ही अन्य चेतनहीन लोकों को जायेंगे।

This verse is intended to those ignorant persons, who have not realised the supreme self.

Demoniac indeed are those worlds, covered by dense darkness, whereto all they go on death, who are self-killers.

शाङ्करभाष्यम्

अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्र आरभ्यते।

असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरास्तेषाञ्च स्वभूता लोका असुर्या नाम। नामशब्दोऽनर्थको निपातः।

ते लोकाः कर्मफलानि। लोक्यन्ते दृश्यन्ते भुज्यन्त इति जन्मानि। अन्धेनादर्शनात्मकेनाज्ञानेन तमसावृता आच्छादिताः, तान्स्थावरान्तान्प्रेत्य त्यक्त्वेमं देहमभिगच्छन्ति यथाकर्म यथाश्रुतम्।

आत्मानं घ्नन्तीत्यात्महनाः। के ते जनाः, येऽविद्वांसः। कथं त आत्मानं नित्यं हिंसन्ति। अविद्यादोषेण विद्यमानस्यात्मनस्तिरस्करणात्। विद्यमानस्य आत्मनो यत्कार्यं फलमजरामरत्वादिसंवेदनलक्षणं तद्धतस्येव तिरोभूतं भवतीति प्राकृताविद्वांसो जना आत्महन उच्यन्ते। तेन ह्यात्महननदोषेण संसरन्ति ते।।

सरलसंस्कृतव्याख्या

विषयतृष्णा, कामक्रोधादिरजोगुणप्रधानाम् आसुरसम्पदां शक्तिं वर्धयति। तेन बोधस्वरूपोऽयमात्मा सम्यगाच्छाद्यते। आसुरसम्पदा ये आत्मानं आच्छादयन्ति ते आत्महनः जनाः। यद्वा आत्मनि पापित्वाद्यध्यासवन्तः। तादृशाध्यासोऽपि आत्महननमेव। भगवद्गीताभाष्ये आचार्येण एतदुक्तम्- न हिनस्त्यात्मनात्मानं इत्यत्र सर्वो हि अत्यन्तप्रसिद्धं साक्षादपरोक्षमात्मानं तिरस्कृत्य अनात्मानं आत्मत्वेन परिगृह्य धर्माधर्मौ कृत्वा आत्मत्वेनोपात्तमात्मानं हत्वा अन्यमात्मानमुपादत्ते नवं, एवं तमपि हत्वा अन्यमित्येवं उपात्तमुपात्तमात्मानं हन्तीति आत्महा सर्वोऽज्ञः यस्तु परमार्थात्मा असावपि सर्वदा अविद्यया हत इव विद्यमानफलाभावात् इति सर्वे अविद्वांसः आत्महन इति द्रष्टव्यम्।

आत्मस्वरूपस्य अज्ञाने प्रादुर्भूताः विषयसङ्कल्पाः मनुष्यवर्गं द्विधा विभजन्ते। देववर्गः, असुरवर्गः इति। सत्वगुणप्रधानभूताः संपदः दैवसंपदः। दैवसंपद्युक्ताः देववर्गाः भवन्ति। आत्माच्छादिकाः कलङ्कभूता एव आसुरसंपदः। निर्भयत्वं, चित्तशुद्धिः इत्यादिका षड्विंशतिर्भावाः दैवसंपदः। दम्भः, दर्पः, अतिमानिता, क्रोधः, पारुष्यं इत्येताः पञ्च आसुरसंपदः। विषयासक्त्या लौकिकसुखभोगेषु निमग्नाः आत्महनः जनाः मृतौ जननमरणरूपेऽस्मिन् संसारे एव पुनरापतन्ति इति भगवद्गीतायामुक्तम् (१६-३)। अयमाशयः बृहदारण्यकोपनिषदि विद्यते (४-४-२२)। अत्र 'अविद्वांसोऽबुधा जनः' इत्येतत् 'आत्महनो जनाः' इत्यस्य आशय एव। दम्भादीनां लक्षणानि- 'मामृते अन्यः धर्मरक्षको नास्तीति चिन्ता' दम्भः। कुलधनादिषु अभिमानः दर्पः। सर्वे मां पूजयेयुः इति चिन्ता अतिमानिता। सर्वेषु कोपभावः (अमर्षः) क्रोधः। परुषस्वभाव एव पारुष्यम्। दैवसंपदः विद्यासंपदः, आसुरसंपदः च अधर्मे नयन्ति जनान्। कर्मगतिमनुसृत्य लोक्यन्ते उत भुज्यन्ते इति लोकाः। कर्मानुसारं मनुजो वा मृगो वा वृक्षो वा भविष्यतीति।

विद्या सर्वार्थसाधिका भवति इह जीवने ततः परमपि। तस्मात् विद्याहीनाः साक्षात् पशवः पुच्छविषाणहीना इति सुभाषितवाक्यं अत्र अनुसन्धेयम्।

हिन्दी व्याख्या

विषयों के प्रति तृणा, काम क्रोध इत्यादि रजोगुण प्रधान आसुरी सम्पत्तियों

की शक्ति को बढाती है। उससे बोधरूप यह आत्मा पूर्ण रूप से आवृत हो जाती है आसुरी सम्पत्तियों से जो आच्छादित होते है वे आत्मघातक लोग होते हैं। अथवा जो अपने पापित्व से आवृत होते हैं उनका ऐसा अध्यास भी आत्म-हनन ही है। भगवद्गीता के स्वरचित भाष्य में आचार्य द्वारा इस प्रकार कहा गया है, 'न हिनस्त्यात्मनात्मात्मनं,' इस भाग में सब लोग अत्यन्त स्पष्ट साक्षात् प्रत्यक्ष या प्रकट आत्मा को छोडकर अनात्म को आत्मारूप से ग्रहण करके धर्माधर्म - विचार करके आत्मरूप से प्राप्त अपने को मारकर अन्य नये आत्मा को या जन्म को स्वीकार करते हैं, उसे भी मारकर नये जन्म में जाते हैं और इस तरह नवीन जन्मों में भी बार-बार आत्मा का हनन करने वाले आत्म हन्ता ही होते हैं। ये सब अज्ञ्नी होते हैं। जो सचमुच आत्मा ही है वह हमेशा अविद्या से हत जैसे प्रकट फल के अभाव से सब अविद्या-प्रेरित जनों को आत्महन्ता ही समझना चाहिए।

आत्मस्वरूप अज्ञान से जनित विषय कल्पनाएँ मनुष्य वर्ग को दो प्रकार से विभक्त करती हैं :- देववर्ग तथा असुरवर्ग। सत्वगुण प्रधान संपत्तियाँ दैवी संपत्तियाँ होती हैं। दैवीसंपत्ति से युक्त व्यक्ति देववर्ग में आते हैं। आत्मा को आच्छादित करनेवाली कलंक-ग्रस्त संपत्तियाँ आसुपी संपत्तियाँ होती हैं। निर्भयता, चित्तशुद्धि इत्यादि छब्बीस भाव दैवी संपत्तियाँ हैं। दम्भ, दर्प, अतिमानिता, क्रोध, परुषता ये पांच आसुरी संपत्तियाँ हैं। विषयासक्त और लोकिक सुखभोगों में निमग्न आत्महन्ता लोग मृत्यु के वशीभूत होकर जनन-मरण रूप इस संसार में ही बार-बार पतित होते हैं, ऐसा भगवद्गीता में कहा गया है। यह भाव बृहदारण्यकोपनिषद् में मिलता है। वहाँ 'अज्ञानी और अबुध जन' कहने से यही 'आत्महन्ता जन' का ही आशय है। दम्भ इत्यादि के लक्षण ये ही हैं :- 'मेरे सिवाय दूसरा धर्मरक्षक नहीं होता, ऐसा सोचना दम्भ है। अपने कुल, धन आदि पर अभिमान करना दर्प है। सब लोग मेरी पूजा या आदर करें ऐसी भावना अतिमानिता है। सब व्यक्तियों पर कोप करना अमर्ष या क्रोध है। परुषस्वभाव ही पारुष्य है। दैवी संपत्तियाँ विद्या-संपत्ति की ओर तथा आसुरी संपत्तियाँ अधर्म की ओर लोगों को चलाती हैं। कर्मगति के अनुसार लोक्यन्ते उत भुज्यन्ते इति लोकाः देखते हैं अर्थात् भोगते हैं यही

लोक शब्द की व्युत्पत्ति है। कर्म के अनुसार ही मनुष्य जानवर या पेड के रूप में पैदा होंगे, यही तात्पर्य है।

विद्या सारे अर्थों को प्राप्त करानेवाली है, इस जीवन में और इसके पश्चात् भी। अतः विद्याहीन व्यक्ति पूँछ और सींग से रहित साक्षात् पशु है, यह सुभाषित-वाक्य यहाँ स्मरणिय है।

English Translation

Deluded by fantastic desires and steeped in the enjoyment of senses, one falls in the category of demoniac persons. Automatically, he becomes a slayer of self. Those who live the soul by performing sinful acts are slayers of self. This is clear in Srisankara's Bhashya commentary on Bhagavadgita.

These slayers of self are called so because enveloped by dense darkness of ignorance, they think of the soul as bound. By desire-prompted actions, they subject the self to continuous births and deaths.

There are two types of created beings- the godly group and the devilish group. Men with divine properties form the godly group and men with demoniac properties are devilish. Godly properties are 26 manners such as fearlessness, non-violence, compassion and purity of mind. Demoniac properties are anger, sternness, pride, arrogance, hypocrisy and ignorance. Self killers belong to the devilish group, which has been recognized as conducive to bondage and not for liberation. The term 'Avidvamso-Abudhah' in Brhadarnyakopanishad also carries the same message, as in "Atmahano Janah" here. Demoniac qualities are defined as follows-

1. Dambha or hypocrasy means posing as a virtuous man.
2. Darpa or arrogance is the feeling of pride, arising

out of wealth, strength, learning etc.

3. Athimanita or pride is regarding himself as superior.
4. Krodhaa or anger is violence in thought with a spirit of revenge.
5. Parushya or sternness is negation of mildness.

Lokas are worlds or states where, the fruits of acts are perceived (lokyate). Duly, according to his acts, one becomes a man or an animal or a plant.

This verse emphasises the absolute necessory of knowledge (of self). "Man without knowledge is none but animal, an animal without tail"- is an old saying.

श्लोकः-४

अनेजदेकं मनसो जवीयो-
नैनद्देवा आप्नुवन्पूर्वमर्षत्।
तद्धावतोऽन्यानत्येति तिष्ठ-
त्तस्मिन्नपो मातरिश्वा दधाति।।४।।

तत् ब्रह्म अचलं, एकं मनसः जवीयः शीघ्रं, पूर्वं गतं एतदिन्द्रियाणि न प्राप्नुवन्ति, तत् एकत्र तिष्ठत्, द्रुतं घावतः अन्यान् इन्द्रियादीनि मनसश्च अतिक्रामति। वायुः तस्मिन् आत्मतत्त्वे, प्राणिनां कर्माणि विभजते।

अद्वय एवं अचल ब्रह्म, मन से भी शीघ्रगामी है। सर्वव्यापक होने से पहले ही गत कहे जा सकनेवाले इस ब्रह्म को इन्द्रियाँ पहुँच नहीं पातीं। किसी एक ही स्थान पर अविचल स्थित यह ब्रह्म द्रुतगामी इन्द्रियादिकों के साथ मन का भी अतिक्रमण करता है। इस आत्मतत्त्व से ही वायु (प्राण) प्राणियों के चेष्टारूप कर्मों को चला रही है।

The self is motionless, one and swifter than mind. Gods or senses could not reach that, which runs ahead of all. Standing, it advances ahead of the others, who run. In that Self air sustains the water, i.e. it sustains all movements and activities.

शाङ्करभाष्यम्

यस्यात्मनो हननादविद्वांसः संसरन्ति तदविपर्ययेण विद्वांसो जना मुच्यन्ते ते नात्महनः, तत् कीदृशमात्मतत्त्वमित्युच्यते।

अनेजत् न एजत्। एजृ कम्पने, कम्पनं चलनं स्वावस्थाप्रच्युतिस्तद्वर्जितं सर्वदैकरूपमित्यर्थः। तच्चैकं सर्वभूतेषु मनसः सङ्कल्पादिलक्षणाद् जवीयो जववत्तरम्।

कथं विरुद्धमुच्यते। ध्रुवं निश्चलमिदं मनसो जवीय इति च।

नैष दोषः। निरुपाध्युपाधिमत्त्वेनोपपत्तेः। तत्र निरुपाधिकेन स्वेन रूपेणोच्यते अनेजदेकमिति। मनसोऽन्तःकरणस्य सङ्कल्पविकल्पलक्षणस्योपाधेरनुवर्त्तनाद् इह देहस्थस्य मनसो ब्रह्मलोकादिदूरगमनं सङ्कल्पेन क्षणमात्राद्भवतीत्यतो

मनसो जविष्ठत्वं लोके प्रसिद्धम्। तस्मिन् मनसि ब्रह्मलोकादीन्द्रुतं गच्छति सति प्रथमं प्राप्त इवात्मचैतन्यावभासो गृह्यतेऽतो मनसो जवीय इत्याह।

नैनद्देवा द्योतनाद्देवाश्चक्षुरादीनीन्द्रियाण्येतत्प्रकृतमात्मतत्त्वं नाप्नुवन् प्राप्तवन्तः। तेभ्यो मनो जवीयः। मनोव्यापारव्यवहितत्त्वाद् आभासमात्रमपि आत्मनो नैव देवानां विषयीभवति।

यस्माज्जवनान्मनसोऽपि पूर्वमर्षत् पूर्वमेव गतं व्योमवद्व्यापित्वात् सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीत्यविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत इत्येतदाह।

तद्धावतो द्रुतं गच्छतोऽन्यानात्मविलक्षणान्मनोवागिन्द्रियप्रभृतीनत्येति अतीत्य गच्छति इव। इवार्थं स्वयमेव दर्शयति तिष्ठदिति स्वयमविक्रियमेव सदित्यर्थः।

तस्मिन्नात्मतत्त्वे सति नित्यचैतन्यस्वभावे मातरिश्वा मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः सर्वप्राणभृत् क्रियात्मको यदाश्रयाणि कार्यकरणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ स मातरिश्वा; अपः कर्माणि प्राणिनां चेष्टालक्षणानि, अग्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशाभिवर्षणादिलक्षणानि दधाति विभजति इत्यर्थः।

धारयतीति वा "भीषास्माद्वातः पवते" (तै.उ. २।८।२) इत्यादि श्रुतिभ्यः। सर्वा हि कार्यकरणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः।

सरलसंस्कृतव्याख्या

आत्महनः अविद्वाँसः संसरन्ति। विद्वाँसो जनाः तत्त्वज्ञानात् मुच्यन्ते च। अस्मिन् मन्त्रे तस्यात्मनः सोपाधिक-निरुपाधिकलक्षणानि निरूप्यन्ते। निरुपाधिकत्वेन अयमात्मा 'अनेजत्' अव्यक्तं एकञ्च भवति। एजृ कम्पने इति धातोः निष्पन्नं भवति एजत् इति पदम्। कम्पनं चलनं स्वावस्थाप्रच्युतिः; तद्वर्जितं सर्वदा एकरूपं इत्यर्थः। न एजत्-अनेजत् सत्यं अचलमित्यर्थः। एकमित्यस्य

सर्वदा सर्वत्र एकमेवेत्यर्थः। एकं सजातीय-विजातीय-स्वगतभेदरहितम्। अखण्डं, अचलं च अनन्तबोध एव सत्यस्वरूपमिति प्रथममन्त्रे प्रतिपादितम्। अखण्डबोधसत्यस्वरूपः निरुपाधिकः, नामरूपोपाधियुक्तः सोपाधिक इति च द्विधा वक्तुं शक्यते। यथा जलाशये स्वरूपं जलं, तरङ्गफेनबुद्बुदादयः स्वभावश्च तद्वत्। ब्रह्मणः स्वरूपं नाम अनाद्यनन्तं स्थिरं कूटस्थं च भवति। स्वभावश्च उत्पत्ति-विनाशयुक्तः भवति। वस्तुनोऽपूर्णदर्शनात् जायमानं भ्रमज्ञानमेव स्वभावः। एतौ आश्रित्य पण्डितैः (सत्यदर्शिभिः) सत्यस्य द्विविधं लक्षणमुक्तम्-स्वरूपं, तटस्थं च। सच्चिदानन्दमिति ब्रह्मणः स्वरूपलक्षणम्। यावल्लक्ष्यकालानवस्थितत्त्वे सति व्यावर्तकत्वं तटस्थलक्षणम्। जगतः जन्मादिकारणं ब्रह्म भवति। तदुक्तम् तैत्तिरीयके- "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म" (III.I.1) इति। वस्तुस्वरूपसाक्षात्कारे सहायभूतं अस्थिरघटकमेव तटस्थलक्षणम्। यथा काकोपलक्षितं गृहम्। मन्त्रेऽस्मिन् न केवलं सत्यस्वरूपप्रतिपादनम् अपि तु तत्प्राप्त्युपाया अपि निर्दिष्टाः। प्रपञ्चस्य मूलकारणं किमित्यन्वेषणमेव सत्यान्वेषणम्। कार्याणां निरीक्षणद्वारा एव तत्कारणं द्रष्टव्यम्। प्रपञ्चानुभवजनकानि त्रीणि मुख्यानि भवन्ति। मनः, इन्द्रियाणि, प्राणश्च। अत्र एतेषां त्रयाणां निरीक्षणमेव सूचयति। 'द्योतनात् देवाः', अतः देवा इति पदस्य विषयप्रकाशनपराणि ज्ञानेन्द्रियाणि इत्यर्थः। प्रपञ्चानुभवे अनुपेक्षणीयौ द्वौ सापेक्षघटकौ भवतः मनः, बाह्यपदार्थाश्च। मनसोऽभावे बाह्यदृश्यानामभावः। बाह्यदृश्यानामभावे मनसोऽभावश्च। तदुक्तम् माण्डूक्यकारिकायाम्-

मनोदृश्यमिदं द्वैतं अद्वैतं परमार्थतः।
मनसोह्यमनीभावे द्वैतं नैवोपलभ्यते।। (III.31)

शब्द-स्पर्श-रूप-रस-गन्धानां सम्मिलितरूपमेव मनः। सङ्कल्पविकल्पलक्षणस्य मनसः ब्रह्मलोकादिदूरदेशगमनं सङ्कल्पेन क्षणमात्रात् भवति इत्यतः मनसो जविष्ठत्वं लोके प्रसिद्धम्। मनसः अधिष्ठानं भवति प्राणः। प्राणो नाम प्रपञ्चघटकानां सर्वेषां चलनानामधिष्ठाता भवति। इदं शक्तिस्पन्दनमेव energy इत्युच्यते। प्राणस्य अथवा शक्तिस्पन्दनस्य अधिष्ठानं

भवति अद्वयसत्यमिति वेदान्तसत्यम्। तदेव आत्मा, ब्रह्म इत्युच्यते। अचलत्वात् कूटस्थादधिष्ठानात् प्राणचलनमारभ्यत इति भारतीयानां ऋषीणां मतम्। मन्त्रस्य अन्तिमपादे एतत् कार्यमेव स्फुटं प्रतिपादयति।

अचञ्चले, ज्ञानस्वरूपे च सत्यवस्तुनि एव सर्वेषां प्रपञ्चदृश्यानां सृष्टिहेतुः प्राणचलनं जायते। प्राणस्पन्दनस्य वेगेन शब्द-स्पर्श-रूप-रस-गन्धभूततन्मात्राणि, तेभ्यः ज्ञानेन्द्रियाणि च उत्पद्यन्ते। तेषां स्पन्दनैक्यात् मनो जायते। मनःस्पन्दनात् व्यष्टिशरीराणि बाह्यदृश्यानि च जायन्ते। अचञ्चलबोधस्वरूपे अखण्डे ब्रह्मण्येव अस्य प्रपञ्चस्य आविर्भाव-तिरोभावौ भवतः। प्रपञ्चस्य उत्पत्तेः पूर्वं, नाशानन्तरं च अखण्डबोधसत्यं अचञ्चलं अद्वयञ्च वर्तते। तस्मादेव अनेजदेकं इत्युक्तं मन्त्रे। आत्मनो जातानि प्राणेन्द्रियमनांसि। अतः मनसः स्थितिः प्रवृत्तिश्च आत्मानमाश्रित्यैव। अस्मिन्नर्थे आत्मा मनसो जवीयान् इत्युक्तम्। इन्द्रियाणां उत्पत्ति -स्थिति-नियामकञ्च ज्ञानमेव। ज्ञानेन्द्रियाणां प्रवृत्तिपथे तत्पूर्वमेव ज्ञानसान्निध्यमस्तीत्यर्थे "नैनद्देवा आप्नुवन्पूर्वमर्षत्" इति स्तूयते। तस्मात् ज्ञानं सर्वत्र वर्तते। नित्यचैतन्यस्वरूपस्य आत्मनः शक्त्या प्राणः सर्वप्राणिकर्माणि विदधाति। न केवलं प्राणिकर्मणां किन्तु सूर्य चन्द्रादि समस्तप्रपञ्चप्रतिभासानां प्रकाशको भवत्यसौ इत्यस्मिन्नर्थे "तस्मिन्नपो मातरिश्वा दधाति" इत्युक्तम्। तदुक्तम्-कठोपनिषदि-

तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति। (II.11.15)

एवं ब्रह्मणः तटस्थलक्षणं, स्वरूपलक्षणञ्च उभयं मन्त्रेऽस्मिन् प्रतिपादितम्। तस्मात् समस्तप्रपञ्चप्रतिभासानां अधिष्ठानभूतं नित्यं, निर्विकारञ्च आत्मतत्त्वम्। तस्य साक्षात्कार एव मानवराशेः परमलक्ष्यम्।

हिन्दी व्याख्या

आत्महन्ता और अज्ञानी जन संसार में (जन्म-मरणों) आवागमन करते रहते हैं और विद्वान जन तत्त्वज्ञान के सहारे (संसार-चक्र से) विमोचित भी होते हैं। इस मंत्र में आत्मा के सोपाधिक और निरुपाधिक लक्षणों पर विचार किया जाता है। निरुपाधिकत्व में यह आत्मा 'अनेजत्' अर्थात् अव्यक्त और एक होता है। 'एजृ कंपने' इस धातु से निष्पन्न ही 'एजत्' शब्द होता है। कम्पन का तात्पर्य है चलना या हिलना अथवा अपनी अवस्था से प्रच्युति से रहित सर्वदा एकरूप ही अर्थ है। 'न एजत्' ही 'अनेजत्' है, इससे तात्पर्य है सत्य की अचलता। एक से मतलब है सदा और सर्वदा एक ही रहना। एक तो सजातीय, विजातीय और स्वगत रहित है। सत्य का स्वरूप अखण्ड, अचल और अनन्त बोध है, यह प्रथम मंत्र में प्रतिपादित है। अखण्डबोध सत्यस्वरूप निरुपाधिक तथा नामरूप इत्यादि उपाधि से युक्त ऐसे दो प्रकार का कहा जा सकता है। यह वैसे है जैसे जलाशय का अपने रूप में स्थित जल तरंग, फेन, बुदबुद इत्यादि के स्वभाव से स्थितरूप से भी दिखाई देता है। स्वरूप तो अनाद्यनन्त, स्थिर और कूटस्थ है। किंतु स्वभाव उत्पत्ति और विनाश से युक्त होता है। वस्तु के अपूर्णदर्शन से जनित होनेवाले भ्रमज्ञान ही स्वभाव है। इन दोनों के आधार पर पण्डितों से (सत्यद्रष्टाओं से) सत्य के दो प्रकार के लक्षण कहे गये हैं- स्वरूप लक्षण एवं तटस्थ लक्षण। सच्चिदानन्द ब्रह्म का स्वरूपलक्षण है। ऐसे लक्षणों के अप्राप्त होने पर परिवर्तन-विधेय जो रूप है वह तटस्थलक्षण है। वैसे जगत् के जन्म आदि का कारण ब्रह्म होता है। वह तैत्तिरीयोपनिषद् में यों कहा गया है- 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व तद् ब्रह्म इति'। (जिस में से ये जीव उत्पन्न होते हैं, जिससे ये उत्पन्न होने वाले जीवित रहते हैं और मृत्यु के बाद जिसमें प्रवेश करके एक होते हैं उसे ब्रह्म जान लेने की चेष्टा करो) वस्तुस्वरूप की साक्षात्कार में सहायक होनेवाले अस्थिर घटक ही तटस्थ लक्षण है। जैसे कौए की उपस्थिति से घर के होने का उपलक्षण होता है। इस मंत्र में सत्य के स्वरूप का प्रतिपादन ही नहीं है अपितु उसे प्राप्त करने के उपाय भी बताये गये हैं। प्रपंच का मूलकारण क्या है, इसका अन्वेषण ही सत्यान्वेषण है। कार्यों के निरीक्षण द्वारा उनके कारण देखे जा सकते हैं। प्रपंच के अनुभवों के जनक तीन पदार्थ हैं- मन, इन्द्रियाँ और प्राण। यहाँ इन तीनों का निरीक्षण सूचित होता है। 'द्योतनात् देवाः,' अर्थात् द्योतन करनेवाले ही देव हैं, अतः 'देवाः' इस शब्द से विषय का प्रकाशन करनेवाली ज्ञानेन्द्रियाँ ही-अभिप्रेत हैं। प्रपंञ्चानुभव में दो सापेक्षघटक होते हैं मन तथा बाह्यपदार्थ। मन के अभाव में बाह्यदृश्यों का अभाव होता है और बाह्य दृश्यों के अभाव में मन का भी अभाव है। मांडूक्य कारिका में यह ऐसा कहा गया है:-

"मनोदृश्यमिदं द्वैतं अद्वैतं परमार्थतः।
मनसोह्यमनीभावे द्वैतं नैवोपलभ्यते।।"

(दिखाई देने वाला यह द्वैत वास्तव में अद्वैत है। मन के अमनीभाव में द्वैत भी उपलब्ध नहीं होता।) मन शब्द, स्पर्श, रूप, रस और गन्धों को सम्मलित रूप है। संकल्प और विकल्प के लक्षणों से युक्त मन ब्रह्मलोक आदि दूरदेशों का गमन कल्पना से क्षणकाल में कर लेता है, इस बात से मन का जविष्ठ अथवा शीघ्र होना जगत में प्रसिद्ध है। मन का अधिष्ठान प्राण है। प्राण तो सारे प्रापंचिक घटकों के हिलने-डुलने का आधार है। शक्ति का यह स्पन्दन ही ऊर्जा (energy) कहलाता है। प्राण या शक्ति-स्पन्दन का अधिष्ठान अद्वय-सत्य है, यही वेदान्त का सत्य है। वही आत्मा अथवा ब्रह्म कहलाता है। अचल और कूटस्थ रहनेवाले इस अधिष्ठान से प्राणों का स्पन्दन शुरु होता है, यही भारतीय ऋषियों का मत है। मन्त्र के अन्तिम पाद में यह कार्य स्पष्ट प्रतिपादित है।

अचंचल और ज्ञानस्वरूप रहनेवाले सत्य पदार्थ में ही समस्त प्रपंच दृश्यों की सृष्टि का कारणभूत प्राण-स्पन्दन घटित होता है। प्राण स्पन्दन के वेग से शब्द स्पर्श-रूप-रस-गन्ध आदि पंचभूतों की तन्मात्राएँ और उनसे ज्ञानेन्द्रियाँ भी उत्पन्न होती हैं। उनके स्पन्दनों की एकता से मन की उत्पत्ति होती है। मन के स्पन्दन में व्यष्टियों के शरीर और बाह्य दृश्य जनित होते हैं। अचञ्चल बोधरूप और अखण्ड ब्रह्म में ही इस प्रपंच का आविर्भाव एवं तिरोभाव घटित होते हैं। प्रपंच की उत्पत्ति के पूर्व तथा विनाश के पश्चात् भी अखण्ड बोध स्वरूप सत्य अचंचल एवं अद्वय ही रहता है। मंत्र में 'अनेजदेक' कहने का यही कारण है। आत्मा से उत्पन्न ही प्राण, इन्द्रिय और मन होते हैं। इस कारण मन की स्थिति और प्रवृत्ति आत्मा के आश्रय में ही होती है। इस अर्थ में ही आत्मा मन से 'जवीयान्' अर्थात् प्रवेगमय कहा गया है। इन्द्रियों की उत्पत्ति. स्थिति तथा नियामक ज्ञान ही है। ज्ञानेन्द्रियों के प्रवृत्ति मार्ग में उसके पहले ही ज्ञान की उपस्थिति वर्तमान है, इस अर्थ में "नैनद्देवा आप्नुवन् पूर्वमर्षत्", ऐसी स्तुति की जाती है। अतः ज्ञान सब कहीं विद्यमान है। नित्य चैतन्य स्वरूप आत्मा की शक्ति से प्राण समस्तप्राणियों के कर्मों का विभाग करता है। केवल प्राणिकर्मों का ही नहीं प्रत्युत् सूर्य चन्द्र आदि सारे प्रपंच-प्रतिभासों का प्रकाशक भी वही है। इस अर्थ में ही "तस्मिन्नपो मातरिश्वा दधाति" कहा गया है। वह कठोपनिषद् में यों प्रतिपादित है:-

"तमेव भान्तमनुभाति सर्वं तस्यभासा सर्वमिदं विभाति"। (II-11-15)

(प्रकाशस्वरूप उसके प्रकाश से सब प्रकाशित होते हैं उसके प्रकाश से यह सारा जगत् प्रकाशमान होता है।) वैसे ब्रह्म के तटस्थ लक्षण और स्वरूप लक्षण - दोनों इस मंत्र में प्रतिपादित हैं। अतः प्रपंच के समस्त प्रतिभासों का आधारभूत, नित्य और निर्विकार ही आत्मतत्त्व है। उसका साक्षात्कार ही मानवसमूह का परम लक्ष्य है।

English Translation

Self-killers, ignorant of the self, bind the soul to the cycle of births and deaths; whereas scholars get themselves liberated with the help of the valid-knowledge of the true self.

Two different attributes apply to the self in two different aspects. The absolute self is changeless, motionless, and worldless. The conditioned self appears to be changing and moving.

"Ejat" is derived from the verb root "Ejru kampane", which means moving or shaking. The soul is Anejat, *i.e.* not shaking or not moving.

'Ekam' means one, one without a second.

This fourth verse is an amplification of the first line of the first verse. The self mentioned here is changeless, formless, motionless, unlimited by any entity and not qualified by any attribute.

For example, considering an ocean, water is its nature and waves and tides are attributes. The nature of Brahman is pure consciosness, which is deathless and is mere eternal existence. The world of forms, motion and creation is a

false super-imposition on It.

Scholars formulate two types of definitions called Svarupa lakshana and Tatastha lakshana. The first definition states the essential nature of Brahman. Here Brahman is described as Existence consciousness and bliss. Tatastha lakshana is the attribute of a thing, which remains only for sometime in it and distinguishes it from the rest. Brahman as per this definition is that from which the origination and others of this universe happen. This definition is clear in Tittiriya Upanishad's statement- "That from which, all these beings are born, on account of which all these are sustained and into which, all these are withdrawn is Brahman." This kind of definition demarcates an object from the rest by indicating some accidental qualifications. For example, we may indicate a particular house to a stranger by pointing out to the crow that is perching on the roof.

To find out the root-cause of the universe is the real investigation of truth. Experiencing the universe becomes possible through three important instruments- the mind, senses and the breath. Here the three are taken for consideration and examination.

The term 'Devah' stands for the senses. Deva as per etymology is that which illuminates. The senses, being subordinate to the mind and the mind being unable to comprehend the self, the self is spoken of as that, which the senses could not reach, and that which runs ahead of all. The innermind and the outer world are related to each other. If one of these is not there, then the other could not be. That is said in Mandukyakarika-

"The absolute is non-dual; pluralistic universe is a mere appearance, perceived by the mind."

Our imagination travels from the earth to Brahmaloka in the twinkling of an eye and that swiftness of the mind is famous. Prana or breath is the source of all movements and activities. It is the basic support of the mind also. And behind all the movement of prana, lies the self, which constitutes the universe. The absolute self is without change, motion and action and still it is the basic power of all that exist. In Him who is the ultimate support of all, the mind, breath, senses and the entire universe enjoy their own existence and activities. It is in Him (self) air upholds the water.

'Water' here means the vast world of numberless stars and planets. The air supports them all, on account of His sustaining power. It is mentioned in Kata-upanisad also- "Everything shines only after that shining light; His shining illuminates all this world."

Thus the two kinds of definitions of Brahman are said in this verse. He, the Brahman is unmoving one, all-pervading and He is the first cause of all. In Him, life conceals and He is the absolute reality.

श्लोकः-५

तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।।५।।

तदात्मतत्त्वं चलति, तत् न चलति, तत् अतिदूरे (शतकोटिवर्षैरपि अविदुषां अप्राप्यम्)। तत् अत्यन्तसमीपे (विदुषां)। तत् सर्वस्य अन्तर्वर्ति, सर्वस्य अस्य जगतः बहिश्च वर्तते।

वह आत्मतत्त्व (सोपाधिक दृष्टि से) विचलित होता है पर (निरुपाधिक दृष्टि से) अविचल रहता हे। अज्ञानियों के लिए अप्राप्य वह विदूरस्थ लगता है किन्तु ज्ञानियों के लिए वह अति समीप है। वह सबके आभ्यंतर में स्थित है, इस सारे जगत के बाहर भी वही स्थित है।

It moves; It moves not; It is far (from the ignorant); It is also near (to the wise); It is inside all and is also outside of ali this.

शाङ्करभाष्यम्

न मन्त्राणां जामितास्तीति पूर्वमन्त्रोक्तमप्यर्थं पुनराह।

तदात्मतत्त्वं यत्प्रकृतं तदेजति चलति; तदेव च नैजति स्वतो नैव चलति; स्वतोऽचलमेव सत् चलतीवेत्यर्थः। किञ्च तद्दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद् दूर इव। तद् उ अन्तिके इति च्छेदः। तद्वन्तिके समीपेऽत्यन्तमेव विदुषामात्मत्वान्न केवलं दूरेऽन्तिके च। तदन्तरभ्यन्तरेऽस्य सर्वस्य य आत्मा सर्वान्तरः (बृ.उ. ३।४।१) इति श्रुतेः। अस्य सर्वस्य जगतो नामरूपक्रियात्मकस्य तदु अपि सर्वस्य अस्य बाह्यतो व्यापकत्वादाकाशवन्निरतिशयसूक्ष्मत्वाद् अन्तः। "प्रज्ञानघन एव" (बृ.उ. ४।५।१३) इति च शासनान्निरन्तरं च।

सरलसंस्कृतव्याख्या

आत्मनः तटस्थलक्षणमुच्यतेऽस्मिन् मन्त्रे। लौकिकस्य मायामयमिदं द्वैतप्रपञ्चं चलनात्मकमिव भवति। किन्तु मायातीतं तु निश्चलमेव। एतत् कार्यं स्फुटयति- तदेजति तन्नैजति इत्यादि विरुद्धप्रस्तावनया। नामरूपात्मकं नानाप्रपञ्चम् अनुभवतः संसारिणः अचञ्चलोऽयमात्मा अतिविदूरे भवति।

अविदुषां वर्षकोटिशतैरपि आत्मतत्त्वमप्राप्यमेव। प्रपञ्चानुभवः, सत्यानुभवश्च युगपत् न भवति। तस्मात् लौकिकभोगानां त्यागेनैव अमृतत्त्वं प्राप्यते। तदुक्तं, 'त्यागेनैके अमृतत्त्वमानशुः' (कैवल्योपनिषद्-३; महानारायणोपनिषत्-VIII.14)। सत्यदर्शिनः स्वहृदयस्थमात्मानमेव साक्षात्कुर्वन्ति। अतः तेषामात्मा समीपे एव भवति। स्वहृदयस्थ आत्मा एव कीटपतङ्गादिसर्वप्राणिनाम् आत्मा इति ते जानन्ति। एतदेव तदन्तरस्य सर्वस्य इत्यनेन भागेन उच्यते। सर्वस्य दृश्यप्रपञ्चस्य बाह्यतश्च अयमेव अखण्डबोधानन्दरूपः आत्मा एव वर्तते। तदु सर्वस्य अस्य बाह्यतः इत्यनेन भागेन अयमेवार्थः प्रकाश्यते। श्रुतिः, प्रज्ञानघन एव अयमात्मा। अयमात्मा अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव- (बृ.उ.४।५।२३) इति। अयमाशयः भगवद्गीतायामप्युक्तः-

बहिरन्तश्च भूतानामचरं चरमेव च।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत्।। (XIII-16)

तस्मात् अन्तः बहिः, अन्तिके दूरे च चराचरात्मकेन स्थितः परमात्मा एक एव सत्यो भवति।

हिन्दी व्याख्या

इस मंत्र में आत्मा का तटस्थ लक्षण बताया जाता है। लौकिक के लिए यह मायामय द्वैत प्रपंच चलनात्मक जैसे होता है किन्तु असल में मायातीत और निश्चल ही है। यह कार्य "तदेजति तन्नैजति" इत्यादि विरुद्ध प्रस्तावना से स्पष्ट किया जाता है। नामरूपात्मक और नाना रूपों में दृश्यमान इस प्रपंच का अनुभव करने वाले संसारी के लिए यह अचञ्चल आत्मा अतिदूरस्थित होता है। अज्ञानी के लिए अनेक कोटि वर्षों के समय से भी आत्मतत्त्व अप्राप्य ही रहता है। प्रपंचानुभव एवं सत्यानुभव दोनों एक साथ संभव नहीं हैं अतः लौकिक भोगों के त्याग से ही अमृतत्त्व सिद्ध होता है। यही 'त्यागेनैकेऽमृतत्त्वमानशुः'- (परित्याग से ही अमृतत्त्व की प्राप्ति होती है) से कहा गया है। सत्यदर्शी लोग अपनी हृदयस्थ आत्मा का ही साक्षात्कार करते हैं। इस कारण उनकी आत्मा समीप में ही स्थित होती है। अपने हृदय में स्थित आत्मा ही कीट और शलभ आदि सब प्राणियों की आत्मा होती है। यही

'तदन्तरस्य सर्वस्य' ऐसे भाग से कहा जाता है। सारे दृश्य प्रपंच के बाहर भी यही अखण्ड बोधानन्द रूप आत्मा ही विद्यमान है। तदु सर्वस्य अस्य बाह्यतः इस भाग से यही अर्थ प्रकट होता है। श्रुति के अनुसार "प्रज्ञानधन एव अयमात्मा" - अर्थात् प्रज्ञानधन ही यह आत्मा है। यह आत्मा अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव (बृ.उ.४।५।२३) - अर्थात् यह आत्मा बाह्याभ्यंतरहीन, समग्र और प्रज्ञानघन ही है। यही आशय भगवद्गीता में भी कहा गया है :-

> "बहिरन्तश्च भूतानामचरं चरमेव च।
> सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत्।।"

अतः अन्दर बाहर समीप में और विदूर में चरात्मकरूप से वर्तमान परमात्मा एक ही सत्य है।

English Translation

Tatasthalakshana or qualification (of Brahman) per accidence is again said here. The soul appears to move, whereas, in reality, It just is and It does not move. This is established here by mentioning the synthesis of contradiction.

The self is far away from the ignorant men. But to the wise, It is very near. Ignorant are those who identify themselves with the body and mind and remain enjoying worldly pleasure. Experiencing the world and realizing the self are totally different, that would not occour simultaniously. Only by giving up the worldly pleasures one can get liberation. But to the wise, soul is the essence of their own being and hence, it is very near to them. They know that their own self is inside all as the indweller or soul. This is said as "Tadantarasya sarvasya"; in this verse.

God exists both within and without all animate and inanimate beings. Hence He is too near and far as well. God, who is consciousness and bliss solidified, ever fills all places, which man regards as distant and near. This is said

in the last line (quarter) of the verse. Upanishads say that the self, outside and inside, altogether is a mass of intelligence only. This idea can be seen in Bhagavad Gita also. It is said, "It exists without and within all beings and constitutes the animate and inanimate creation as well. And by the reason of its subtlety, it is incomprehensible. It is close and afar too".

So the animate and inanimate creation is not something different from Him. That creation too consists His being.

श्लोकः-६

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।६।।

आत्मान्तर्दर्शी तु प्रापञ्चिकानि सर्वाणि वस्तूनि परमात्मन्येव साक्षात्करोति। कार्यकारणरूपेषु सर्वप्रपञ्चवस्तुषु परमात्मानं च साक्षात्करोति। अनन्तरं तस्मात् न निन्दति।

आत्मदर्शी पुरुष समस्त प्रापंचिक वस्तुओं का परमात्मा में ही साक्षात्कार करता है और वैसे ही कार्य-कारणरूप से सब प्रापंचिक वस्तुओं में परमात्मा का ही साक्षात्कार करता है। इस दशा में वह किसी की भी निन्दा नहीं करता।

Whosoever sees all beings in self and sees the self in all beings does not shrink from aught; does not hate anything.

शाङ्करभाष्यम्

यः परिव्राड् मुमुक्षुः सर्वाणि भूतान्यव्यक्तादीनि स्थावरान्तानि आत्मन्येवानुपश्यत्यात्मव्यतिरिक्तानि न पश्यतीत्यर्थः, सर्वभूतेषु च तेष्वेव चात्मानं तेषाम् अपि भूतानां स्वमात्मानमात्मत्वेन यथास्य देहस्य कार्यकरणसङ्घातस्यात्मा अहं सर्वप्रत्ययसाक्षिभूतश्चेतयिता केवलो निर्गुणोऽनेनैव स्वरूपेणाव्यक्तादीनां स्थावरान्तानामहमेवात्मेति सर्वभूतेषु चात्मानं निर्विशेषं यस्त्वनुपश्यति स ततस्तस्मादेव दर्शनान्न विजुगुप्सते विजुगुप्सां घृणां न करोति।

प्राप्तस्यैवानुवादोऽयम्। सर्वा हि घृणात्मनोऽन्यद्दुष्टं पश्यतो भवति, आत्मानमेवात्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानिमित्तम् अर्थान्तरमस्तीति प्राप्तमेव। ततो न विजुगुप्सत इति।

सरलसंस्कृतव्याख्या

षष्ठ-सप्तम मन्त्राभ्यां आत्मदर्शिनः स्वरूपतत्प्रयोजनं च प्रोक्तम्। सत्य-सनातनाद्वयामेयश्च परमात्मा।स इदं जगत् प्रकाशयति। प्रापञ्चिकनामरूपाणि सर्वाणि स्वात्मन्येव उत्पद्यन्ते विलीयन्ते च इत्यनुस्यूतानुभवो जायते। एवं स आत्मदर्शी सर्वदृश्यपदार्थेष्वपि अहमेव आत्मरूपेण वर्त इति च साक्षात्करोति।

तथाविधात्मदर्शिनः मात्सर्यं वा विद्वेषः, परिहासो वा न जायते। मरुः एव मरीचिका इति जानानेन मरीचिकादर्शनवेलायामपि सा मरीचिका मरुः एवेति, न जलमिति ज्ञातुं शक्यते। एतादृशसाक्षात्कारानुभव एव उपनिषत्सु यस्तु सर्वाणि भूतानि इत्यनेन मन्त्रेण प्रकाशितः। वस्तुतः सर्वभूतेषु आत्मदर्शनं आत्मनि सर्वभूतदर्शनं चैकमेव। सामान्यबुद्धीनां जनानां अखण्डैकरसस्य आत्मानुभवस्य बोधायैव वैरुध्यात्मकप्रतिपादनं भवति।

अयमाशयः भगवद्गीतायामुक्तः-

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः।। (VI.9)
आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन। (VI.32)

यदा आत्मैकत्वज्ञानेन उपमृदितभेदबुद्धिः तदा समस्तप्राणिवर्गेषु औदार्य - स्नेह-सौहृदादयः जायन्ते। लौकिकजीवनेऽपि अस्य मन्त्रस्य अत्यन्तप्रसक्तिरस्ति। परिच्छिन्न शरीरेन्द्रियादिकमेव अहमिति मन्यमानाः जनाः सर्वथा प्रमाद्यन्ति, अनर्थं च प्रतिपद्यन्ते, नानाविधपापकर्माणि चाचरन्ति। जीवपरैक्यज्ञानं जनेषु एकताबुद्धिं जनयति, अज्ञानकृतं नानात्वं च निवर्त्तते।

हिन्दी व्याख्या

छठे और सातवें मंत्रों से आत्मदर्शी का स्वरूप और उसके प्रयोजन कहे गये हैं। सत्य, सनातन अद्वय एवं अमेय ही परमात्मा है। वह इस जगत को प्रकाशमान करता है। प्रापंचिक सारे नामरूप हमारी अपनी आत्मा में ही उत्पन्न होते है और विलीन होते हैं। इसका अनस्यूत अनुभव होता है। इस प्रकार आत्मदर्शी सारे दृश्य पदार्थों में भी "मैं स्वयं ही आत्मा रूप में विद्यमान होता हूँ" ऐसा साक्षात्कार करता है। ऐसे आत्मदर्शी के मात्सर्य, विद्वेष अथवा परिहास नहीं होते। मरु ही मरीचिका है ऐसा विश्वास हो जाने पर, मरीचिका के दर्शन के समय वह मरीचिका मरु ही है, जल नहीं, ऐसी धारणा की जा सकती हैं।

साक्षात्कार का ऐसा ही अनुभव उपनिषद में "यस्तु सर्वाणि भूतानि" इस मंत्र से प्रकाशित है। वास्तव में सारे भूतों में अपनी आत्मा का दर्शन और अपनी आत्मा में सर्वभूतों का दर्शन दोनों एक ही हैं। अखण्ड और एकरस

रहने वाना आत्मानुभव सामान्य बुद्धिवाले लोगों के बोधन के लिए ही वैरुद्ध्यात्मक प्रतिपादन होता है।

इसका आशय भगवद्गीता में ये बताया गता है :-

“सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योग-युक्तात्मा सर्वत्र समदर्शिनः।।” (IV-9)
“आत्मौपम्येन सर्वत्र समं पश्यति योर्जुन”। (VI-32)

जब आत्मैकत्व की जानकारी से भेद बुद्धि नष्ट हो जायगी तब समस्त प्राणि-वर्गों से औदार्य, स्नेह, सौहार्द आदि उत्पन्न हो जायेंगे। लौकिक जीवन में भी इस मंत्र का बहुत अधिक सांगत्य होता है। परिच्छिन्न शरीर, इन्द्रिय आदि को ही मैं हूँ ऐसा माननेवाले लोग सर्वथा प्रमाद के वशग होकर अनर्थ को प्राप्त होते हैं और अनेक प्रकार के पापकर्मों का आचरण करते हैं। पराये और अपने जीवों का एकत्वज्ञान लोगों में एकत्व बुद्धि को पैदा करता है और अज्ञानसंभूत नानात्व की बुद्धि का निवारण भी करता है।

English Translation

In the sixth and seventh verses, experience of the self and its effect are described. The inner self is one, which alone is real and eternal. Its shining only illuminates all this world. All other beings are born within It and withdrawn into It. By seeing that self in everything and everything in the self, one does not repel or hate anything, for there is nothing but the one true self. Having understood that a mirage is nothing but a sandy desert, one on seeing a mirage again, does not think of water there. Such kind of experiencing the self is presented in upanishads. We can see this in Bhagavatgita also- “A man with such experience can perceive self everywhere as well as everything in the self also. By realizing that fact, he sees unity everywhere”. He does not hate anything; He does not struggle to preserve himself.

So, this idea of this verse can be applied in our worldly life also. Narrow minded persons mistake everything and get themselves engaged in wrong activities. The knowledge of oneness based on Advaita can be a remedy for their ignorance and the spirit of differences created there by.

In the sixth and seventh verses, experience of the self and its effect are described. The inner self is one, which alone is real and eternal. Its shining only illuminates all this world. All other beings are born within It and withdrawn into It. By seeing that self in everything and everything in the self, one does not repel or hate anything, for there is nothing but the one true self. Having understood that a mirage is nothing but a sandy desert, one on seeing a mirage again, does not think of water there. Such kind of experiencing the self is presented in upanishads. We can see this in Bhagavatgita also-” A man with such experience can perceive self everywhere as well as everything in the self also. By realizing that fact, he sees unity everywhere.”. He does not hate anything; He does not struggle to preserve himself.

So, this idea of this verse can be applied in our worldly life also. Narrow minded persons mistake everything and get themselves engaged in wrong activities. The knowledge of oneness based on Advaita can be a remedy for their ignorance and the spirit of differences created there by.

श्लोकः-७

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः।।७।।

यस्मिन् काले आत्मतत्त्वं विजानतः आत्मदर्शिनः कामकर्मादिजानि सर्वाणि भूतानि आत्मैवाभूत्। तस्मिन् काले साक्षात्कृतैक्यस्य तस्य शोकमोहयोः निवृत्तिः प्रदर्शिता।

सब में एकत्व का साक्षात्कार करने वाले अर्थात् समस्त भूत जात को अपनी ही आत्मा रूप से पहचाननेवाले आत्मदर्शी के शोक-मोहों की निवृत्ति स्वयं ही हो ज्ाती है, यही यहाँ कहा गया है।

In that state of complete knowledge of self, when the self alone is perceived and experienced in everything, what delusion can be there and what sorrow when oneness is perceived?

शाङ्करभाष्यम्

इममेवार्थमन्योऽपि मन्त्र आह।

यस्मिन्काले यथोक्तात्मनि वा तान्येव भूतानि सर्वाणि परमार्थात्मदर्शनादात्मैवाभूद् आत्मैव संवृत्तः परमार्थवस्तु विजानतस्तत्र तस्मिन्काले तत्रात्मनि वा को मोहः कः शोकः। शोकश्च मोहश्च कामकर्मबीजम् अजानतो भवति। न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः।

को मोहः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेण असम्भवप्रदर्शनात् सकारणस्य संसारस्यात्यन्तमेवोच्छेदः प्रदर्शितो भवति।

सरलसंस्कृतव्याख्या

निरतिशयानन्दस्वरूपः आत्मा। अत एव दुःखास्पृष्टः। आत्मानमजानतः शोकमोहादयो भवन्ति। शोकमोहौ अज्ञानकार्यौ भवतः। सत्यदर्शिनां अज्ञाननाशात् तयोः शोकमोहयोः नाशः। शोकमोहादिभ्यः कामकर्मादीनि तन्मूलकसंसारश्च जायन्ते। नानात्वेन दृश्यमानाः पदार्थाः सत्यमिति प्रतीतिः भवत्यज्ञानम्। तस्मात् अज्ञानिनः देहादिसर्वबाह्यविषयेषु रागो, द्वेषश्च जायेते। सुखप्राप्त्यर्थं नश्वराणां दृश्यपदार्थानामाश्रयेण अनुस्यूतशोकानुभवो जायते।

एतस्य शोकस्य निवारणार्थं पुनः पुनः नश्वरान् जडपदार्थान् आश्रयन्ते। पुनरन्यं शोकञ्च लभते, अयं मोह इत्युच्यते। अयथार्थं यथार्थं मत्वा सुखावाप्त्यर्थं जडपदार्थान् अनुधावन्ति। काम-क्रोधादिचित्तवृत्तयः वर्धयन्ति मोहम्। तथा नित्यानन्दस्वरूपमात्मानं स्मर्तुमपि अशक्ता अज्ञानस्य अन्धतमसमार्गं अनुसरन्ति। एकत्वमनुपश्यतः इति मन्त्रस्य अर्थस्तावत् एकत्वं नाम परामात्माभेदः यद्वा मूलाज्ञाननिरासेन विशुद्धस्वात्मैक्यम्। अनुपश्यतः इति अस्मासु सततं आत्मदर्शनं भवेदिति सूच्यते। एवं आत्मैकत्वमनुपश्यतः, शोकमोहादेः अविद्याकार्यत्वात् मूलाविद्यानिवृत्यैव शोकादेरपि आत्यन्तिकी निवृत्तिः। कारणनिवृत्तौ तत्कार्यस्यापि निवृत्तिरिति नियमात्। सा एव विद्याफलत्वेन विवक्षिता। इदं च तरति शोकमात्मविद् इत्यादिश्रुतिसिद्धमेव। (छान्दोग्योपनिषत्-VII.2.3)

हिन्दी व्याख्या

निरतिशय आन्दस्वरूप ही आत्मा है। इस कारण वह दुःख से अस्पृष्ट भी है। आत्मा को जान न लेने से ही शोक, मोह आदि होते हैं। शोक और मोह अज्ञान के कार्य हैं। सत्यदर्शियों के अज्ञान के विनाश से उनके शोक, मोह आदि का नाश होता है। शोक, मोहादि से काम, कर्म आदि और उनके मूल से उत्पन्न संसार भी पैदा होते हैं। नानात्व से दृश्यमान पदार्थ सत्य की प्रतीति पैदा करते हैं जो अज्ञान से जनित है। उससे अज्ञानियों के देहादि सारे बाह्य विषयों में राग और द्वेष उत्पन्न होते हैं। सुख की प्राप्ति के लिए नश्वर दृश्य पदार्थों का आश्रय करने से निन्तर शोकानुभव घटित होता है। इस शोक के निवारण के लिए नश्वर जड पदार्थों का आश्रय लिया जाता है। अनन्तर अन्य शोक भी प्राप्त होता है। यही मोह कहलाता है। अयथार्थ को यथार्थ मानकर सुख-प्राप्ति के लिए जड पदार्थों के पीछे दौडा जाता है। काम, क्रोध आदि चित्तवृत्तियाँ मोह को बढाती हैं। वैसे ही नित्यानन्द स्वरूप आत्मा को स्मरण करने में अशक्त होकर अज्ञान के अन्धतामससमार्ग का अनुसरण किया जाता है। "एकत्वमनुपश्यतः" इस मंत्र का अर्थ तब एकत्व द्वारा सूचित परमात्मा के साथ अभेद अथवा मूल अज्ञान के तिरस्कार से विशुद्ध आत्मा से ऐक्य होता है। "अनुपश्यतः" इस कथन से हमारे अन्दर सतत आत्मदर्शन किया

जा सकता है, ऐसा सूचित होता है। इस प्रकार आत्मैकत्व का अपने भीतर सतत दर्शन करने वाले के शोक मोह आदि अविद्या से जनित होने से मूल अविद्या की निवृत्ति शोकादि की आत्यन्तिक निवृत्ति का भी कारण होता है इस नियम से कि कारण की निवृत्ति से उसके कार्य की भी निवृत्ति होती है। वही विद्या प्राप्ति के फलत्व से विवक्षित है। यह तो 'तरति शोकमात्मविद्'- (आत्मविद् शोक को पार करता है)- इत्यादि वेद में सिद्ध ही है।

English Translation

Delution and sorrow are born of ignorance. When the self alone is perceived and experienced in everything, there can be no delution. Then there will be no desire and as a result there will be no sorrow. Sense of sorrow is born of desire, which arises from the sense of duality. So, with the knowledge of oneness, one can get rid of delution, desire and sorrow.

Generally, people depend upon non-eternal matters for a happy life and so they fall in the sea of sorrow. Again they take refuge in some other non-eternal matters and again fall in some other kinds of sorrow. Unable even to think of the self, they walk in the path of darkness of ignorance.

Oneness does not mean mere unity, it means identity. It is the identity of the self with paramatma.

Ignorance is the root cause of all kinds of sorrow. Once the knowledge of self is gained, ignorance is removed and hence no place for any sorrow. How can effect be produced, when the cause is removed? That is why, upanishads say, "knower of self overcomes the sorrow".

श्लोकः-८

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरँ शुद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्
व्यदधाच्छाश्वतीभ्यः समाभ्यः।।८।।

स आत्मा सर्वगतः, दीप्तिमान्, अशरीरः, अक्षतः, शरीररहितः, निर्मलः, धर्माधर्मरहितः, क्रान्तदर्शी (सर्वदृक्) सर्वज्ञः, परिभूः स्वयंभूः स नित्येभ्यः संवत्सरेभ्यः कर्तव्यपदार्थान्, यथातथाभावो यथातत्थ्यं तस्मात् तत्त्वतः व्यभजत्।

वह आत्मा सर्वव्यापक, प्रकाशमान, शरीरहीन, क्षतिहीन, स्नायुहीन, निर्मल, धर्माधर्मरहित, क्रान्तदर्शी, सर्वज्ञ, सर्वोत्तम एवं स्वयंभू हैं। वही शाश्वत संवत्सरादिकों के लिए अपने कर्तव्य-कर्मों का यथावत् विभाजन करके प्रदान करता है।

He is all-pervading, bright, unlimited by body or muscles, stainless, pure and untainted by sin. He is the seer, the thinker. He is above all, self-supporting. He has distributed all things of the world properly, in accord with their inner natures, through eternal years.

शाङ्करभाष्यम्

योऽयमतीतैर्मन्त्रैरुक्त आत्मा स स्वेन रूपेण किंलक्षण इत्याहायं मन्त्रः।

स यथोक्त आत्मा पर्यगात्परिसमन्तादगाद्गतवानाकाशवद्व्यापी इत्यर्थः। शुक्रं शुद्धं ज्योतिष्मद्दीप्तिमानित्यर्थः। अकायमशरीरो लिङ्गशरीरवर्जित इत्यर्थः। अव्रणम् अक्षतम्। अस्नाविरं स्नावाः शिरा यस्मिन्न विद्यन्त इत्यस्नाविरम्। अव्रणमस्नाविरमित्याभ्यां स्थूलशरीरप्रतिषेधः। शुद्धं निर्मलमविद्यामलरहितमिति कारणशरीरप्रतिषेधः। अपापविद्धं धर्माधर्मादिपापवर्जितम्।

शुक्रमित्यादीनि वचांसि पुँल्लिङ्गत्वेन परिणेयानि। स पर्यगादित्युपक्रम्य कविर्मनिषीत्यादिना पुँल्लिङ्गत्वेनोपसंहारात्।

कविः क्रान्तदर्शी सर्वदृक्। "नान्योऽतोऽस्ति द्रष्टा"(बृ.उ. ३।८।११) इत्यादिश्रुतेः। मनीषी मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः। परिभूः सर्वेषां पर्युपरि भवतीति परिभूः। स्वयम्भूः स्वयमेव भवतीति। येषामुपरि भवति यश्चोपरि

भवति स सर्वः स्वयमेव भवतीति स्वयम्भूः।

स नित्यमुक्त ईश्वरो याथातथ्यतः सर्वज्ञत्वाद्यथातथाभावो याथातथ्यं तस्माद्यथाभूतकर्मफलसाधनतोऽर्थान् कर्त्तव्यपदार्थान् व्यदधाद्विहितवान् यथानुरूपं व्यभजदित्यर्थः, शाश्वतीभ्यो नित्याभ्यः समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्य इत्यर्थः।

अत्राद्येन मन्त्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः "ईशावास्यमिदं सर्वं....... मा गृधः कस्यस्विद्धनम्" इति। अज्ञानां जिजीविषूणां ज्ञाननिष्ठासम्भवे "कुर्वन्नेवेह कर्माणि.....जिजीविषेत्" इति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः। (भगवद्गीता-III.22)

अनयोश्च निष्ठयोर्विभागो मन्त्रप्रदर्शितयोर्बृहदारण्यकेऽपि प्रदर्शितः "सोऽकामयत जाया मे स्यात्" (बृ.उ. १।४।१७) इत्यादिना अज्ञस्य कामिनः कर्माणीति। "मन एवास्यात्मा वाग्जाया" (बृ.उ. १।४।१७) इत्यादिवचनाद् अज्ञत्वं कामित्वं च कर्मनिष्ठस्य निश्चितमवगम्यते। तथा च तत्फलं सप्तान्नसर्गस्तेष्वात्मभावेनात्मस्वरूपावस्थानम्।

जायाद्येषणात्रयसंन्यासेन च आत्मविदां कर्मनिष्ठाप्रतिकूल्येनात्मस्वरूपनिष्ठैव दर्शिता "किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः"(बृ.उ. ४।४।२२) इत्यादिना। ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्योऽसुर्या नाम त इत्यादिना अविद्वन्निन्दाद्वारेण आत्मनो याथात्म्यं स पर्यगाद् इत्येतदन्तैर्मन्त्रैरुपदिष्टम्। ते ह्यत्राधिकृता न कामिन इति। तथा च श्वेताश्वतराणां मन्त्रोपनिषदि "अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम्" (श्वे.उ. ६।२२) इत्यादि विभज्योक्तम्।

सरलसंस्कृतव्याख्या

अस्मिन् मन्त्रे ब्रह्मणः स्वरूपं ब्रह्मज्ञस्य स्वरूपानुभवश्च वर्ण्यते। प्रपञ्चस्य जड - चेतनयोः सम्मिलितरूपेण द्रष्टृणां लोकानां प्रतीतिः। किन्तु जडस्पर्शलेशं विना शुद्धं चेतनं बोधसत्यं विविच्य ज्ञातुं शक्यत इति अद्वैतनिर्णयः।अभ्यासेन निषेधेन च श्रुतयः शुद्धसत्यस्वरूपं विवृण्वन्ति। सत्यः, सर्वव्यापी, सर्वज्ञः, सर्वशक्तः, शुद्धः, सर्वातिक्रान्तः, नित्यः, ज्योतिःस्वरूपश्च इति ब्रह्मणः स्वरूपप्रतिपादकाः शब्दाः भवन्ति। अत्यन्तनिगूढत्वात् संसारे निमग्नानां जनानां

अचिन्त्यमेतत् तत्त्वम्। तस्मादेव सगुणोपासना निर्दिश्यते ऋषिभिः। परमात्मनि जन्म-मृत्यु-जरा-व्याधिदुःखादिदेहदोषाणां छायापि नास्तीति प्रदर्शनार्थमेव निषेधरूपेण प्रतिपादनम्। अत्र अकाय इति पदेन सूक्ष्मशरीर (लिङ्गशरीर) निषेधः। सूक्ष्मशरीरात् स्थूलशरीरस्योत्पत्तिः। सूक्ष्मशरीरस्य लयावस्था एव कारणशरीरम्। कारणशरीरे सूक्ष्मशरीरस्य लयात् लिङ्गशरीरमित्युच्यते। लीयत इति लिङ्गं भवति। पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चवायवः, मनः, बुद्धिश्चेति सप्तदशावयवोपेतं शरीरं लिङ्गशरीरमित्युच्यते। आत्मसाक्षात्कारेणैव लिङ्गशरीरस्य नाशः। सर्वक्लेशानां कारणं इदं सूक्ष्मशरीरमेव। अव्रणं-अक्षतं, अस्नाविरं स्नावाः शिराः यस्मिन् न विद्यन्ते इत्यनेन भागेन स्थूलशरीरनिषेधः।

मन्त्रस्य प्रथमपादे सर्वव्यापी, सर्वसाक्षी, सर्वज्ञः, स्वयंभूः, सर्वोत्तमः अयमात्मा इति अभ्यासरूपेण निर्णयः। द्वितीयपादे अकायम्, अव्रणम्, अस्नाविरम्, अपापविद्धम् इति निषेधरूपेण तत्त्वनिर्णयः। ततः मन्त्रस्य अन्तिमभागे सृष्टिरहस्यं संगृहीतम्। शुद्धपदेन अविद्यया अस्पृष्टः, अत एव कारणरहितश्च। शरीराभावात् धर्माधर्मौ पुण्यपापे वा न संबद्ध्येते। सर्वव्यापित्वात्, सर्वान्तर्यामित्वाच्च स सर्वसाक्षी सर्वज्ञश्च। सर्वाणि दृश्यवस्तूनि तस्मात् जातानि इत्यतः स सर्वोत्तमः। सर्वेषां कारणभूतस्य तस्य कारणान्तराभावात् स स्वयंभूः। स्वयमेव भवति इति स्वयंभूः। सायणाचार्येण अनन्याधीनसत्ताकं स्वयंभूरित्युक्तम्। संवत्सररूपिणीभिः प्रजाभिः कार्याणि कारयन्ति। चेतनसान्निद्ध्यादेव लोके सर्वाः प्रवृत्तयः भवन्ति। अथवा लोके सर्वा विभूतयः आत्मनः प्रकाश एव। स शाश्वतीभ्यः समाभ्यः अर्थान् याथातथ्यतः व्यदधात् इत्यनेन मन्त्रभागेन आत्मज्ञानिना अनवाप्तं प्राप्तव्यं किमपि नास्तीत्युक्तम्। भगवद्गीतायां अयमाशयः-नानवाप्तमवाप्तव्यम् इति।

सत्यदर्शिनः लोकेऽस्मिन् प्राप्तव्यं किञ्चिदपि नास्ति। ते एव लोकसंग्रहार्थं निःस्वार्थसेवनं कर्तुं समर्थाः भवन्ति। तदुक्तं विवेकचूडामणौ श्रीशङ्करभगवद्पादैः- 'शान्ता महान्तो निवसन्ति सन्तो वसन्तवत् लोकहितं चरन्तः'। (श्लो-३९)

हिन्दी व्याख्या

इस मंत्र में ब्रह्म के स्वरूप तथा ब्रह्मज्ञ के स्वरूपानुभव दोनों का वर्णन होता है। प्रपंच को जडचेतनों का सम्मिलितरूप देखना देखनेवाले जनों की प्रतीति है। किन्तु जडस्पर्श को अंश से भी विहीन शुद्ध चेतनरूप बोध सत्य विवेचित करके जाना जा सकता है, यही अद्वैत का निर्णय है। अभ्यास तथा निषेध से शुद्ध सत्य के स्वरूप का विवरण श्रुतियाँ करती हैं। सत्य सर्वव्यापी, सर्वज्ञ, सर्वशक्त, शुद्ध, सर्वातिक्रान्त, नित्य तथा ज्योति स्वरूप रहनेवाले ब्रह्म के स्वरूपप्रतिपादक ही वेद हैं। अत्यंत रहस्यमय होने से संसारी जनों के लिए यह तत्त्व अचिन्त्य है। इस कारण से ही ऋषियों द्वारा सगुणोपासना का निर्देश किया जाता है। परमात्मा में जन्म, मृत्यु, जरा, व्याधि, दुःख इत्यादि दैहिक दोषों की छाया भी नहीं होती, इसको दिखाने के लिए निषेधरूप से इसका प्रतिपादन किया जाता है। यहाँ 'अकाय' पद से सूक्ष्म शरीर (लिंग शरीर) का निषेध किया जाता है। सूक्ष्म शरीर से स्थूल शरीर की उत्पत्ति होती है, सूक्ष्मशरीर के लय की अवस्था ही कारण शरीर है। कारण शरीर में सूक्ष्मशरीर के लय से लिंग शरीर की उत्पत्ति है, ऐसा कहा जाता है। 'लीयते इति लिंगः' अर्थात् लीन होने वाला लिंग होता है। पंचज्ञानेन्द्रिय, पंचकर्मेन्द्रिय, पंचप्राण, मन और बुद्धि ऐसे सत्रह अवयवों से युक्त शरीर ही लिंग शरीर कहलाता है। आत्मा के साक्षात्कार से ही सूक्ष्मशरीर का नाश होता है। समस्त क्लेशों का कारण यह सूक्ष्म शरीर ही है। 'अव्रणं' अर्थात् अक्षतं 'अस्नाविरं' अर्थात् स्नायु या शिरा जिस में नहीं होती - इस भाग से स्थूल शरीर का निषेध किया जाता है।

मंत्र के प्रथम पाद में सर्वव्यापी सर्वसाक्षी सर्वज्ञ, स्वयंभू और सर्वोत्तम ही यह आत्मा है, ऐसा अभ्यास रूप से निर्णीत है। कठोपनिषद् में यह कहा गया है :-

'तमेव भान्तमनुभाति सर्वं तस्यभासा सर्वमिदं विभाति'।

अर्थात् प्रकाशमान उसके प्रकाश से सब प्रकाशित होते हैं।

द्वितीय पाद में अकाय, अव्रण, अस्नाविर और अपापविद्ध ऐसे निषेध रूपसे तत्त्वनिर्णय किया गया है। मंत्र के अन्तिम भाग में सृष्टि रहस्य संगृहीत

है। 'शुद्ध' इस पद से अविद्या से अस्पृष्ट अत एव कारण रहित भी वह है। शरीर के न होने से धर्माधर्म अथवा पुण्य-पाप से वह असंबद्ध रहता है। सर्वव्यापी और सर्वान्तर्यामी होने से वह सर्वसाक्षी एवं सर्वज्ञ भी होता है। सारे दृश्य पदार्थ उससे उत्पन्न होते हैं, इस कारण वह सर्वोत्तम भी है। सभी के कारणभूत बने हुए उसके अन्यकारणों के अभाव में वह स्वयंभू है। स्वयं ही उत्पन्न होने वाला स्वयंभूः। जिनके ऊपर वह उत्पन्न होता है, और जो सब के ऊपर होता है और स्वयं ही आविर्भूत होता है, वही स्वयंभू है। 'अनन्याधीनसत्तात्मकं स्वयंभूरित्युक्तम्'- अन्य सत्ता के अधीन जो नहीं है वह स्वयंभू कहलाता है, ऐसा सायणाचार्य का मत है। संवत्सररूपिणी प्रजाओं से कार्य कराया जाता हैं। चेतन के सान्निध्य से ही जगत् में सब कर्म होते हैं। अथवा जगत की सारी विभूतियाँ आत्मा का ही प्रकाश है। 'स शाश्वतीभ्यः समाभ्यः' अर्थात् याथातथ्यतः व्यदधात् - उसने रूप से विभाजित करके दिया है। इस मंत्रभाग से आत्मज्ञानियों द्वारा प्राप्तव्य कुछ भी नहीं, यह सूचित किया गया है। यही भाव भगवद्गीता में भी मिलता है :- ''नानवाप्तमवाप्तव्यम्''- आत्मज्ञानी के लिए अनवाप्त तथा अवाप्तव्य कोई वस्तु नहीं है।

इस लोक में सत्यदर्शी के लिए प्राप्तव्य कुछ भी नहीं है। ऐसे लोग ही लोकसंग्रहार्थं विना स्वार्थ के सेवा करने में समर्थ होते हैं। यह बात विवेकचूडामणि में श्री-शंकरभगवत्पादाचार्य द्वारा यों कहा गया है :-

शान्ता महान्तो निवसन्ति सन्तो
वसन्तवत् लोकहितं चरन्तः।।

(प्रशान्तमना महान सन्तं लोग लोक हित को लक्ष्य करके वसन्त के समान चलते रहते है)

English Translation

This verse is a description of the self and human experience of the self. The world is of senseless objects mixed with self-consciousness according to common people. Advaita philosophy teaches us the pure state of consciousness of Brahman, without any relationship with the senseless objects.

The pure self is defined in vedas through possitive and negative dimensions. It is real, all seer, all pervading, pure, eternal and shining. It is also non-dual, unknown, unlimited and unchanged.

The present verse also defines the soul in both of its forms. The first half maintains that the soul is unbodied, uninjured, muscleless and untainted by sin. The second half says that the self is all-seer, the thinker, self-existent, all-pervading and beyond everything.

'Akayam' here is taken to mean, "without the subtle body". Gross body has already been excluded by the terms 'Asnaaviram' (muscleless) and Avranam (woundless). Gross body or sthula sarira, is a product of the subtle body or sukhshma sarira. The karana sarira or the seed body is into which, the subtle body is ultimately withdrawn. Five sense organs, five motor organs, five types of air, the mind and the intellect are the seventeen parts present in the Linga Sariram.

The subtle body is destroyed, once the inner soul is perceived. The self is said as pure which means, free from Avidya or ignorance and hence causeless also. As it is unbodied, it is free from sins and virtues. As it is all-pervading, it could be all-seer also. It is greater than all, as it is the root-cause of all. It is causeless and hence self-existent. Sayanacharya explains 'svayambhu' as independent.

This self is spoken of distributing everything in its place for eternal years. This statement in the verse stands to denote that He controls the movement of the world of things. It also denotes that the wise have nothing to be earned, as they have experienced the inner self. Bhagavadgita has the same opinion in its line- "Nanavaptam avaptavyam".

They act not for earning something, but for the sake of the world. Their activities are nothing but human service without selfishness. Sri Sankaracharya mentions this in Viveka Chudamani- "Good and great persons live here performing social- service alone".

श्लोकः-९

अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायांरताः।।९।।

ये विद्याविरोधीनि कर्माणि सेवन्ते, ते अन्धन्तमः प्रविशन्ति। ये उ विद्यायां देवताज्ञाने तत्पराः ते तस्मात् तमसोऽपि बहुतरमेव तमः प्रविशन्ति।

जो विद्या-विरोधी कर्म में लग जाते हैं (अविद्या के कारण यज्ञादि का अनुष्ठान करते रहते हैं) वे अन्ध तम में प्रवेश करते हैं। पर जो विद्यारूप देवताज्ञान में तत्पर रहते है, वे और भी कडे अन्धेरे में प्रवेश करते हैं।

Those who are devoted to non-knowledge by performing merely sacrificial works enter into dense darkness. Those who merely revel in knowledge enter into as if denser darkness.

शाङ्करभाष्यम्

ये तु कर्मणि कर्मनिष्ठा एव जिजीविषवस्तेभ्य इदमुच्यते कथं पुनरेवमवगम्यते न तु सर्वेषाम् इति।

उच्यते-अकामिनः साध्यसाधनभेदोपमर्देन 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति यदात्मैकत्वविज्ञानम् (उक्तम्) तत्र केनचित्कर्मणा ज्ञानान्तरेण वा ह्यमूढः समुच्चिचीषति। इह तु समुच्चिचीषया अविद्वदादिनिन्दा क्रियते। तत्र च यस्य येन समुच्चयः सम्भवति न्यायतः शास्त्रतो वा तदिहोच्यते यद्दैवं वित्तं देवताविषयं ज्ञानं कर्म सम्बन्धित्वेनोपन्यस्तं न परमात्मज्ञानम्। "विद्यया देवलोकः" (बृ.उ. १।५।१३) इति पृथक्फलश्रवणात्। तयोर्ज्ञानकर्मणोरिह एकैकानुष्ठाननिन्दा समुच्चिचीषया न निन्दापरैव एकैकस्य पृथक्फलश्रवणात्; "विद्यया तदारोहन्ति," विद्यया देवलोकः (बृ.उ. १।५.१३) इति। न हि शास्त्रविहितं किञ्चिदकर्तव्यतामियात्।

तत्र अन्धन्तमोऽदर्शनात्मकं तमः प्रविशन्ति। के? येऽविद्यां विद्याया अन्या अविद्या तां कर्म इत्यर्थः, कर्मणो विद्याविरोधित्वात्; तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः। ततस्तस्मादन्धात्मकात्तमसो भूय इव बहुतरमेव ते तमः प्रविशन्ति, के? कर्म हित्वा ये उ ये तु विद्यायामेव देवताज्ञान एव रता अभिरताः। तत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह; अन्यथा फलवदफलवतोः सन्निहितयोरङ्गाङ्गितैव स्याद् इत्यर्थः।

सरलसंस्कृतव्याख्या

अष्टममन्त्रपर्यन्तं ईशावास्यमिदं सर्वं इति प्रथममन्त्रोक्तं ज्ञाननिष्ठानां स्वभावस्वरूपादिकं वर्णितम्। सदा ज्ञानविरोधि भवति कर्म। कर्तृत्वभोक्तृत्वादिधर्मसहितं अग्निहोत्रादि कर्म, कमपि संसारं नयति। अत उच्यते 'अविद्यया अन्धं तमः प्रविशति'। द्वितीयपादे प्रयुक्तस्य 'विद्या' शब्दस्य 'देवताज्ञानं' इत्यर्थः। देवताज्ञानमपि कर्मविरोधि एव। कर्मणः फलं पितृलोकप्राप्तिः, देवताज्ञानस्य फलं देवलोकप्राप्तिश्च। तदुक्तं श्रुतिषु "कर्मणा पितृलोकः विद्यया देवलोकः" (बृहदारण्यकोपनिषत्-II.5.16) इति। कर्म, देवतोपासना च साक्षात् आत्मप्राप्त्युपायभूते न भवतः। यथा दीपात् दूरस्थौ द्वौ, तयोरेकः दीपाभिमुखं गच्छति ; अपरस्तु प्रतीपं गच्छति च। दीपाभिमुखं गच्छतः पुरुषस्य गमनं दीपपर्यवसायि भवति किन्तु अपरस्य यानम् अनन्तं भवति।

श्रीमद्भगवद्गीतायां-

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन।
निर्द्वन्द्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान्।। इति। (II.45)

मन्त्रे भूय इव इति इव शब्दप्रयोगः श्रद्धेयो भवति। अत्र श्रीशङ्करः देवतोपासनायां रतान् देवतादर्शनफलमुद्दिश्य वृक्षस्य अर्धभागमारुह्य पतितेन उपमिनोति। किन्तु कर्ममार्गमवलम्बानं पुरुषं वृक्षमूले एव स्थितेन उपमिनोति। वृक्षमूले तिष्ठतः न फलसिद्धिः अपि तु अतीवदुःखानुभवश्च। तादृशाः अन्धं तमः प्रविशन्ति इत्युच्यते। कर्मविधीनां उद्देशमज्ञात्वा तत्त्वज्ञानार्थं श्रमं विना, कर्मानुष्ठाने निमग्नाः तथा एकं, अद्वयं, अजं, अमरं, सर्वगतं, सर्वज्ञं, च आत्मानं, अविदित्वा नानाविधेषु देवतोपासनेषु रताः च नित्यप्रकाशस्वरूपं ब्रह्म न साक्षात्कुर्वन्ति। अयमाशयः बृहदारण्यकेऽपि उपपाद्यते।

हिन्दी व्याख्या

आठवें मंत्र तक ईशावास्यमिदं सर्वं इस प्रथम मंत्र में उक्त ज्ञाननिष्ठों के

स्वभाव, स्वरूप आदि वर्णित हैं। कर्म सदा ज्ञान के प्रतिकूल पडता है। कतृत्व, भोक्तृत्व आदि धर्माचार सहित अग्निहोत्र जैसे कर्म भी किसी-न-किसी सांसारिकता की ओर ले चलते हैं। तभी कहा जाता है अविद्यया अन्धं तमः प्रविशति-अविद्यया अर्थात् अज्ञान जन्य कर्मों को करने से धने अन्धकार में प्रवेश करना पडता है। द्वितीय पाद में प्रयुक्त विद्या शब्द का अर्थ देवताज्ञान है। देवताओं का ज्ञान भी कर्म के ही समान ज्ञान का विरोधी है। कर्म का फल पितृलोक की प्राप्ति है और देवता ज्ञान का फल देवलोक की प्राप्ति है। कर्म तथा देवतोपासना दोनों आत्मप्राप्ति के उपाय नहीं होते। जैसे दो व्यक्ति दीपक से दूर स्थित हैं। उनमें एक दीप के अभिमुख जाता है और दूसरा दीप की विपरीत दिशा की ओर जाता है। दीप के अभिमुख जानेवाले व्यक्ति का जाना दीपक तक पहुँच कर समाप्त होता है और दूसरे का जाना अनन्त की ओर चलता रहता है। बृहदारण्यकोपनिषत् में भी यह मंत्र विद्यमान है। (IV-4-10) श्रीमद्भगवद्गीता में कहा गया है :- "त्रैगुण्य विषया वेदा निस्त्रैगुण्यो भवार्जुन"। (वेद त्रिगुणों के विषयों का प्रतिपादन करते है अतः हे अर्जुन, तुम निस्त्रैगुण्य हो जाओ। तात्पर्य यह कि वेद प्रोक्त कर्म भी विषयों की प्रतिपत्ति को बढाने वाले होते हैं, इस कारण कर्मे के प्रति आकृष्ट हुए विना रहना अथवा निस्त्रैगुण्य रहना चाहिए।) इस मंत्र में, भूय इव जो प्रयुक्त है, वह ध्यान देने योग्य है। यहाँ श्री शंकर देवताओं की उपासना में लगे देवतादर्शन के फल को लक्ष्य करके रहने वाले की उपमा वृक्ष के अधे भाग तक चढकर नीचे गिरनेवाल से करते हैं। किन्तु कर्म मार्ग का अवलम्बन करनेवाले की उपमा वृक्षमूल में ही स्थित व्यक्ति से करते हैं। वृक्षमूल में खडे व्यक्ति को भी फलसिद्धि नहीं होती, यही नहीं, बहूत दुःखों का अनुभव भी करना पडता है। ऐसे ही अन्ध जन अन्धकार में प्रविष्ट होते हैं ऐसा कहा गया है। कर्मविधियों के उद्देश्य को विना जाने, तत्त्वज्ञान को प्राप्त करने का परिश्रम किये बगैर कर्मानुष्ठान में जो लगे रहते हैं तथा जो एक, अद्वय, अज, अपर, सर्वगत और सर्वज्ञ आत्मा को बिना जाने अनेक प्रकार के देवताओं की उपासनाओं में निमग्न होते हैं वे दोनों प्रकार के लोग नित्य प्रकाश स्वरूप ब्रह्म का साक्षात्कार नहीं कर पाते। यह आशय बृहदारण्यकोपनिषद में भी प्रतिपादित है।

English Translation

The whole Upanishad can be divided into two sections. The first one is upto the eighth verse and is addressed to wise men who are fit for knowledge. The second section is addressed to the ignorant wordly man who is still bound by works.

Sacrificial works and knowledge of self are so diametrically opposed to each other. Those who merely perform sacrificial works, enter into darkness.

Knowledge of the Gods also, like the works is opposed to the self-knowledge. Sacrificial works lead us to the world of matter, while the knowledge of Gods can lead us to the world of Gods. Neither of them can lead us to self-knowledge or liberation. 'Vidya' in this verse denotes the inferior knowledge of Gods. 'Avidya' means works.

Two persons in a dark place happen to see a light; one moves towards the light and reaches it. The other walks in the opposite direction and enters into darkness, with his journey infinite yet. This is the example for the wise and ignorant of the self.

The present verse can be seen in Brhadarnyaka also. Bhagavad gita also has the similar idea, while saying as follows "vedas deal with the evolutes of the three gunas (modes of prakrti). Arjuna; you should be indifferent to these enjoyments rising above the pairs of opposites like pain and pleasure, established in the eternal Existence, unconcerned about the gain and preservation and self-controlled."

The term 'Bhooya Iva' in this verse requires special mention and attention. It means, "as if greater". Those, who are devoted to sacrifices, enter into deep darkness. Revellers in knowledge of Gods enter as if denser darkness.

The former is like a man simply sitting under a tree and the latter is like one, who falls down while trying to climb the tree. Both of them could not obtain the fruits there in the tree. Such kind of people enters blind darkness.

By merely performing sacrifices without having the the knowledge of its real purpose, one enters into darkness. By merely revelling in knowledge of Gods without the knowledge of self, one enters as if in to greater darkness.

श्लोकः-१०

अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे।।१०।।

अद्वैतसत्यसाक्षात्कार एव आत्मज्ञानस्य फलम्। अविद्यायास्तु सुखानुभवार्थं नानात्वभ्रमेषु अभिरतानां दुःखानुभव एव फलम्। अतः विद्याविद्ये भिन्नमार्गौ, तयोः फलं च भिन्ने इति विविच्य ज्ञातव्यमिति मन्त्रेण अनुशिष्यते।

अद्वैतरूपी सत्य का साक्षात्कार ही आत्मज्ञान का फल है और सुखानुभवार्थ नानात्व के भ्रमों में लगकर दुःख भोगना ही अविद्या का फल है। अतः विद्या और अविद्या भिन्न मार्ग हैं। उनके फल भी भिन्न-भिन्न हैं। ऐसा विवेचन करके समझ लेना चाहिए यही इस मंत्र के द्वारा सिखाया जाता है।

The result of knowledge is different indeed and different again is the result of sacrificial works. Thus we have heard from the wise ones. who have revealed it to us.

शाङ्करभाष्यम्

अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुर्वदन्ति "विद्यया देवलोकः" (बृ.उ. १।५.१३) "विद्यया तदारोहन्ति" इति श्रुतेः। अन्यदाहुरविद्यया कर्मणा क्रियते "कर्मणा पितृलोकः" (बृ.उ. १।५।१३) इति श्रुतेः। इत्येवं शुश्रुम श्रुतवन्तो वयं धीराणां धीमतां वचनम्। ये आचार्या नोऽस्मभ्यं तत्कर्म च ज्ञानं च विचचक्षिरे व्याख्यातवन्तस्तेषामयमागमः पारम्पर्यागत इत्यर्थः।

सरलसंस्कृतव्याख्या

विद्या नाम देवतोपासना इत्येव मन्त्रेऽस्मिन् भाष्यकारेण उक्तम्। विद्यया देवलोकः (बृ.उ. २.५.२६) विद्यया तदारोहन्ति इति श्रुत्या विद्यायाः देवतोपासनायाः फलं देवलोकप्राप्तिरित्युच्यते। अविद्यया कर्मणा। कर्मणा पितृलोकः (बृ.उ. २/७/१६) इति श्रुत्या कर्मणः फलं पितृलोकप्राप्तिरिति अनयोः फलं विविच्य उक्तम्।।

हिन्दी व्याख्या

'विद्यया देवलोकः'- विद्या से देवलोक प्राप्त होते हैं (बृहदारण्यकोपनिषद्

२।५।२६) “विद्यया तदारोहन्ति” इस श्रुतिवाक्य से देवतोपासनारूप विद्या से देवलोक की प्राप्ति कथित है। कर्मरूप अविद्या से ‘कर्मणा पितृलोकः’ अर्थात् कर्म से पितृलोक की प्राप्ति (बृ.उ. २।७।२६) है। इस श्रुतिवाक्य से कर्मों का फल पितृलोक की प्राप्ति कहकर दोनों को फलों को विवेचित करके बताये गये हैं।

English Translation

The result of vidya is different from the result of Avidya. ‘Vidya’ here means the knowledge of Gods. One who worships gods, goes to the world of gods and one who performs sacrificial works, goes to the world of ancestors. This difference is mentioned in Brhadaranyaka also as ‘vidyaya devalokah and karmana pitrlokah.

श्लोकः-११

विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।११।।

देवताज्ञानं कर्म च तदेतत् उभयं सहैकेन ज्ञायते चेत्, स अग्निहोत्रादिकर्मणा मृत्युं अतिक्रम्य देवताज्ञानेन अमृतं (देवात्मभावं) प्राप्नोति।

जो (विद्यारूप) देवता की उपासना और (अविद्यारूप) कर्मानुष्ठान - दोनों का निर्वाह एक साथ करता है। वह अग्निहोत्रादि कर्मों से मृत्यु का अतिक्रमण करके देवता-ज्ञान से अमृतत्त्व को पा जाता है।

He, who knows both vidya and Avidya (knowledge and Sacrifices) together, overcomes death by Avidya and enjoys immortality by vidya.

शाङ्करभाष्यम्

यत एवमतो विद्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः। यस्तदेतदुभयं सहैकेन पुरुषेण अनुष्ठेयं वेद तस्यैवं समुच्चयकारिण एव एकपुरुषार्थसम्बन्धः क्रमेण स्यादित्युच्यते।

अविद्यया कर्मणा अग्निहोत्रादिना; मृत्युं स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यमुभयं; तीर्त्वा अतिक्रम्य; विद्यया देवताज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति।

सरलसंस्कृतव्याख्या

ये कर्माणि देवतोपासनारूपेण कुर्वन्ति तेषां फलं मन्त्रेऽस्मिन् प्रतिपाद्यते। ईश्वरार्पणबुद्ध्या फलाभिसन्धिवर्जितं क्रियमाणं कर्म केवलात् फलाभिसन्धिरहितात् कर्मणः श्रेयः। देवतोपासनारूपेण कर्म कुर्वाणस्य उपासकस्य मनः तस्यां देवतायां आसक्तं भवति। अतः कर्तृत्व-भोक्तृत्वादयो भावाः क्षीयन्ते। एवं मृत्युपदवाच्यात् संसारात् तात्कालिकीं मुक्तिं देवात्मभावं अनुभवति। मन्त्रेऽस्मिन् अमृतं इति पदेन जननमरणरहितकैवल्यावस्थेति नार्थः किन्तु देवतानां अमृतावस्था आपेक्षिकी एव। आभूतसंप्लवं स्थानममृतत्त्वं प्रचक्षते।।

हिन्दी व्याख्या

जो देवतोपसानारूप से कर्म करते हैं उनको प्राप्त होने वाले फल का प्रकृत मंत्र में प्रतिपादन किया जाता है। ईश्वरार्पण बुद्धि से फल की अभिलाषा को छोडकर किया जाने वाला कर्म फलेच्छा से रहित होने से श्रेय होता है। देवतोपासनारूप से कर्म करने वाले उपासक का मन उस देवता में आसक्त हो जाता है। उसकारण कर्तृत्व और भोक्तृत्व के भाव क्षीण हो जाते हैं। मृत्यु पद के कथन से संसार से तात्कालिक मुक्ति प्राप्त करके देवात्मभाव का अनुभव करता है। इस मंत्र में प्रयुक्त अमृत शब्द से जनन मरण से रहित कैवल्यावस्था का अर्थ नहीं है बल्कि देवताओं की अमृतावस्था जो आपेक्षिक है, वही सूचित है। अमृतत्त्व अभूत-संप्लव-स्थान अर्थात् स्थायी अचंचलस्थान कहलाता है।

English Translation

What is the result for one, who combines the knowledge of gods with sacrificial works? That is told here in this verse. He performs sacrifices with a pure dedication to God. The mere performance of action even if it is without any attachment would not be as great as it is when dedicated to God. By that dedication, he gets his heart purified, overcomes the impurities, and attains immortality by the knowledge of self.

Immortality here does not mean the true immortality of Brahman; but a partial immortality, a stage attained by gods.

श्लोकः-१२

अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते।
ततो भूय इव ते तमो य उ सम्भूत्याँ रताः।।१२।।

ये अजां प्रकृतिं उपासते ते अदर्शनात्मकं अन्धं तमः (प्रकृतिलये) प्रविशन्ति। ये उ हिरण्यगर्भाख्यकार्यब्रह्मणि रताः ते तस्मादपि बहुतरमिव तमः प्रविशन्ति।

जो अजन्मा प्रकृति की उपासना करते हैं। वे (प्रकृति के लय के अवसर) घोर अन्धेरे में प्रविष्ट होते हैं। जो हिरण्यगर्भ कहलाने वाले कार्य - ब्रह्म में मन लगाते हैं, वे और भी गहन अन्धकार में प्रवेश करते हैं।

Those who are devoted to manifested Nature enter into dense darness (into a state of absorption in nature). Those who worship Hiranyagarbha enter into denser darkness.

शाङ्करभाष्यम्

अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निन्दोच्यते।

अन्धं तमः प्रविशन्ति ये असम्भूतिं सम्भवनं सम्भूतिः सा यस्य कार्यस्य सा सम्भूतिः, तस्या अन्या असम्भूतिः प्रकृतिः कारणमविद्या अव्याकृताख्या; तामसम्भूतिमव्याकृताख्यां प्रकृतिं कारणमविद्यां कामकर्मबीजभूतामदर्शनात्मिकामुपासते ये, ते तदनुरूपमेवान्धं तमोऽदर्शनात्मकं प्रविशन्ति। ततस्तस्मादपि भूयो बहुतरमिव तमः प्रविशन्ति य उ सम्भूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये रताः।

सरलसंस्कृतव्याख्या

अनन्तरमन्त्रत्रये व्याकृताव्याकृतोपासने प्रतिपाद्येते। अत्र संभूतिः नाम सम्यक् भवः इत्यर्थः, तद्विपरीतोऽसंभूतिः। असंभूतिर्नाम अव्याकृतं, प्रपञ्चस्य बीजभूता अविद्या, माया इत्युच्यते। अव्याकृतात् प्रकृतेः सृष्टिः आरभ्यते। व्याकृतावस्था एव संभूतिशब्देन उच्यते। समष्टिरूपः हिरण्यगर्भ एव प्रथमा व्याकृतावस्था। उपासके उपास्यस्य गुणाः जायन्ते, अन्ते उपास्येन एकीभावश्च। सृष्टौ ईश्वरस्य उपाधिभूतायाः मायायाः उपासनया उपासकः अन्ते प्रकृत्यां

लीयते। तत्र सुषुप्तिवत् संसारसुखदुःखे न जानाति। किन्तु कामकर्माणां बीजम् अज्ञानं तस्यामस्ति। अतः सा अन्धकार इत्युच्यते। कार्यब्रह्मणो हिरण्यगर्भस्य उपासनया तन्निष्ठाणिमाद्यष्टैश्वर्य सिद्धिः, सर्वज्ञत्वसर्वव्यापित्वसर्वैश्वर्यादयो गुणाश्च भवन्ति। किन्तु अस्यापि मायाधीनत्वात् मायातीता पुनरावृत्तिरहिता च सच्चिदानन्दपदप्राप्तिः न संभवति। अतः व्याकृतोपासनापि अज्ञानान्धकारात् अस्मान् न रक्षति।

हिन्दी व्याख्या

आगे आने वाले तीन मंत्रों में व्याकृत तथा अव्याकृत उपासनाओं का उपपादन किया जाता है। यहाँ प्रयुक्त 'संभूति' का अर्थ 'सम्यक् भव' तथा उसके विपरीत है 'असंभूति'। असंभूति का तात्पर्य अव्याकृत है जो प्रपंच की आधारभूत अविद्या अथवा माया कहलाती है। अव्याकृत से प्रकृति की सृष्टि आरंभित होती है। व्याकृतावस्था ही संभूति शब्द से कही जाती है। समष्टिरूप हिरण्यगर्भ ही पहली व्याकृतावस्था है। उपासक में उपास्य के गुणों का आविर्भाव होता है और अन्त में उपास्य के साथ एकीभवन भी होता है। वहाँ सुषुप्तिसदृश संसार-दुःख बिना जाने ही रहता है। किन्तु उसमें भी कामकर्म का बीज अज्ञान होता है। सृष्टि में ईश्वर की उपाधिभूत माया की उपासना से उपासक अन्त में प्रकृति में लीन होता हैं। अतः वह अवस्था अन्धकारपूर्ण कही जाती है। कार्य ब्रह्म रूप हिरण्यगर्भ की उपासना से अणिमा, गरिमा जैसे अष्ट-ऐश्वर्यों की सिद्धि होती है, सर्वज्ञत्व, सर्वव्यापित्व, सर्वैश्वर्य आदि गुण भी सिद्ध होते हैं। किन्तु उसके भी मायाधीनत्व होने से मायातीत और पुनरावृत्तिरहित सच्चिदानन्दपद की प्राप्ति संभव नहीं होती। अतः व्याकृत की उपासना भी अज्ञान के अन्धकार के हमारी रक्षा नहीं करती।

English Translation

Worshipping manifest and unmanifest is said in the next three verses.

"Sambhooti" means manifested creature, which is subject to creation. 'Asambhooti' means unmanifested, that is the Avyakta or ignorance. The former can also mean 'Hiranyagarbha' of whom all created beings are the result.

Brahman associated with Maya is the cause of the world. Maya is responsible for all the appearences of Brahman. One who performs meditation of Maya gets into a state of absorption in it. He would remain in a concealed state, similar to sleeping, without any pain or pleasure. That is why, it is called blind darkness.

One, who worships Hiranyagarbha, obtains all eight divine faculties of minuteness and others. But he is also bound under the control of Maya and has not overcome it.

So these kinds of meditation lead us to darkness only and they cannot protect us.

श्लोकः-१३

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात्।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे।।१३।।

कार्यब्रह्मोपासनायाः फलं पृथगेव। अव्याकृतोपासनाफलमपि पृथगेव आहुः। ये आचार्याः अस्माकं तदुभयं व्याख्यातवन्तः, तेषां बुद्धिमतां वचनं शुश्रुम।

कार्यब्रह्म की उपासना का फल भिन्न है। अन्याकृत की उपासना का फल भी भिन्न है। ऐसा कहा गया है। इन दोनों की व्याख्या करने वाले हमारे बुद्धिमान आचार्यों की वाणी हमने सुनी हैं।

The result of Sambhava *i.e.*, devotion to manifested nature is different indeed and different again is the result of Asambhava *i.e.*, worshipping Hiranyagarbha. Thus we have heard from the wise ones, who have revealed it to us.

शाङ्करभाष्यम्

अधुनोभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह।

अन्यदेव पृथगेवाहुः फलं सम्भवात्सम्भूतेः कार्यब्रह्मोपासनादणिमाद्यैश्वर्यलक्षणं व्याख्यातवन्त इत्यर्थः। तथा चान्यदाहुरसम्भवादसम्भूतेरव्याकृताद् अव्याकृतोपासनात्। यदुक्तमन्धन्तमः प्रविशन्तीति प्रकृतिलय इति च पौराणिकैरुच्यत इत्येवं शुश्रुम धीराणां वचनं ये नस्तद्विचचक्षिरे व्याकृताव्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः।

सरलसंस्कृतव्याख्या

संभूत्यसंभूत्योः फलं पृथगेव। संभूतिमार्गस्य अनुस्यूततया अखण्डब्रह्मानुभूतिः, अन्ते शुद्धब्रह्मैव भवति। असंभूतिरिति अविद्यामार्गेण जननमरणरूपे संसारचक्रे भ्रमन्ति।

हिन्दी व्याख्या

संभूति एवं असंभूति का फल पृथक ही है। संभूतिमार्ग की अनुस्यूतता से अखण्ड ब्रह्म की अनुभूति अन्त में शुद्ध ब्रह्म ही बन जाती है। असंभूतिरूप अविद्या के मार्ग से जनन-मरण के संसार-चक्र में भ्रमित होना पडता है।

English Translation

Sambhooti and Asambhooti yield different results. Sambhooti is the path of knowledge, which results in the experience of the external Bliss. Asambhooti is the path of ignorance which results in the cycle of birth and death.

Or similar to the tenth verse, this may be defined. Both worshippers of sambhooti and asambhooti can get different results, which are in no way related with the Eternal Bliss.

श्लोकः-१४

सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह।
विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते।।१४।।

अव्याकृतं च, कार्यब्रह्म हिरण्यगर्भं चैतद्द्वयमपि यो युगपद् वेद जानाति, सः हिरण्यगर्भोपासनया अमृतं-प्रकृतिलयं अश्नुते।

जो अव्याकृत एवं हिरण्यगर्भरूप कार्यब्रह्म दोनों को एक साथ जान लेता है, वह हिरण्यगर्भ की उपासना से अमृतत्त्व (प्रकृति-लय) को प्राप्त करता है।

He, who knows both Sambhava and Asmbhava together, overcomes death by Asambhava and enjoys immortality by Sambhava.

शाङ्करभाष्यम्

यत एवमतः समुच्चयः सम्भूत्यसम्भूत्युपासनयोर्युक्त एवैकपुरुषार्थत्वाच्चेत्याह।

सम्भूतिं च विनाशं च यस्तद्वेदोभ सह। विनाशो धर्मो यस्य कार्यस्य स तेन धर्मिणा अभेदेन उच्यते विनाश इति, तेन तदुपासनेनानैश्वर्यमधर्मकामादिदोषजातं च मृत्युं तीर्त्वा। हिरण्य-गर्भोपासंनेनाप्तिह्यणिमादिप्राप्तिः फलम्, तेनानैश्वर्यादिमृत्युमतीत्य असम्भूत्या अव्याकृतोपासनया अमृतं प्रकृतिलयलक्षणमश्नुते।

सम्भूतिं च विनाशं चेत्यत्रावर्णलोपेन निर्देशो द्रष्टव्यः प्रकृतिलयफलश्रुत्यनुरोधात्।

मानुषदैववित्तसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयान्तम्। एतावती संसारगतिः। अतः परं पूर्वोक्तमात्मैवाभूद्विजानत इति सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम्। एवं द्विप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽत्र प्रकाशितः। तत्र प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यान्तं ब्राह्मणमुपयुक्तम्। निवृत्तिलक्षणस्य वेदार्थस्य प्रकाशनेऽत ऊर्ध्वं बृहदारण्यकमुपयुक्तम्।

तत्र निषेकादिश्मशानान्तं कर्म कुर्वन् जिजीविषेद्यो विद्यया सहापरब्रह्मविषयया तदुक्तं "विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते "इति।

सरलसंस्कृतव्याख्या

संभूत्यसंभूत्योः समुच्चयस्य पृथगनुष्ठानापेक्षया, उत्कृष्टफलतां प्रदर्शयन्ति। श्रीशङ्कराचार्येण संभूतिरिति पदस्य आदौ अ इत्यक्षरं अध्याहार्य असंभूतिरिति व्याख्यायते। विनाश इति पदेन विनाशयुक्तः धर्मी उच्यते। कार्यब्रह्म हिरण्यगर्भ उच्यते। हिरण्यगर्भोपासनया समष्टिरूपोपाधिकः भवति इत्यतः व्यष्टिरूपोपाधिकस्य परिमितान् दोषान् च अतिक्रामति। ततः उपासकः अव्याकृतोपासनया व्याकृतावस्थां च अतिक्रम्य गुणानां समतुलितावस्थां प्राप्य प्रकृत्यां लीयते। तस्मिन् कल्पे पुनर्जन्म नास्तीत्यतः सा अवस्था आपेक्षिकममृतत्त्वमुच्यते। अनन्तरकल्पे कामकर्मानुसृतं जन्म भविष्यति च। अतः अव्याकृतोपासनायाः फलं प्रकृतिलयान्तं एव। एतावत्पर्यन्तं संसारगतिः। एतदपि परमपदप्रापणाय नालम्। प्रकृत्या अपि अतीतनिर्गुणब्रह्मपदप्राप्तिरेव कैवल्यम्। तत्तु सर्वेषणासंन्यासपूर्वक निर्विकल्पकात्मज्ञानेनैव सिद्ध्यति। एवं अस्मिन् प्रवृत्तिनिवृत्तिलक्षणो वेदोक्तो धर्मः प्रतिपाद्दितः।

हिन्दी व्याख्या

संभूति और असंभूति के समुच्चय के अलग-अलग अनुष्ठान की अपेक्षा से उत्कृष्ट फलत्व का प्रदर्शन किया जाता है। श्रीशंकराचार्य द्वारा संभूति शब्द के आरंभ में अक्षर 'अ' के अध्याहार से असंभूति शब्द बनाया जाकर उसकी व्याख्या की जाती है। विनाश शब्द से विनाशयुक्त धर्मी अभिप्रेत है। कार्य ब्रह्मरूपोपाधि हिरण्यगर्भ कहलाता है। हिरण्यगर्भ की उपासना से समष्टिरुपोपाधिक होता है। अतः व्यष्टिरूपोपाधि वाले के सीमित दोषों का भी अतिक्रमण करता है। अनन्तर उपासक अव्याकृत की उपासना से व्याकृतावस्था का भी-अतिक्रमण करके त्रिगुणों की समतुलिन अवस्था को पाकर प्रकृति से लय प्राप्त करता है। उस कल्प में पुनर्जन्म नहीं होता। अतः उस अवस्था को आपेक्षिक अमृतत्त्व कहा जाता है। बाद के कल्प में काम कर्म के अनुसार जन्म भी होगा। उस कारण से अव्याकृत की उपासना का फल प्रकृति में लीन होने तक ही है। इस अवस्था तक ही संसार की गति है।

लेकिन यह भी परम पद की प्राप्ति केलिए पर्याप्त नहीं है। प्रकृत्या ही अतीत निर्गुण ब्रह्म के पद की प्राप्ति का नाम ही कैवल्य है। वह तो सारी एषणाओं के परित्यागपूर्वक प्राप्य निर्विकल्प आत्मज्ञान से ही सिद्ध होता है। इस प्रकार प्रवृत्तिलक्षण तथा निवृत्तिलक्षण से युक्त वेद प्रोक्त धर्म प्रतिपादित हुआ है।

English Translation

If one combines devotion to Sambhooti with devotion to Asambhooti, the result will be greater.

Srisankara suggests that the opening word of the first line, Sambhuti, should be read as Asambhuti, by adding a letter 'A' as prefix.

By worshiping Hiranygarbha, one gets psychic powers, thereby transcending the limitations of the body, and by worshipping Maya, he overcomes the evil propensities in the mind and gets absorbed in prakrti. There will be no rebirth during that Kalpa and hence it is called (partial) immortality. However, he will be born in the succeeding kalpa. Hence it is not liberation; this is only a form of bondage, the ultimate form of samsara or bondage.

The real liberation is attaining Brahman which is devoid of all qualities. That is possible only through the renunciation followed by the knowledge of self.

The two vedic paths of action and inaction are thus explained in these verses.

श्लोकः-१५

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।१५।।

ज्योतिर्मयेन अपिधानेन सत्यस्य ब्रह्मणः द्वारं आच्छादितम्। हे पूषन्, तत् तत्त्वं सत्यधर्माय मह्यं अनुष्ठात्रे दर्शनाय अपसारय।

ज्योतिर्मय पिधान से सत्यरूप परब्रह्म का मुख आच्छादित है। पूषादेव (सूर्यदेव), मुझ सत्यधर्मसाधक के दर्शन के लिए उस ढक्कन को निकाल कर अलग कीजिए।

The face of truth is covered by a golden disc. O Pooshan! (The Nourisher), remove it to enable me, one who holds Truth as a law of life to see the truth.

109370

शाङ्करभाष्यम्

तत्र केन मार्गेणामृतत्त्वमश्नुत इत्युच्यते। तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष एतदुभयं सत्यम्। ब्रह्मोपासीनो यथोक्तकर्मकृच्च यः सोऽन्तकाले प्राप्ते सत्यात्मानमात्मनः प्राप्तिद्वारं याचते हिरण्मयेन पात्रेण इति।

हिरण्मयमिव हिरण्मयं ज्योतिर्मयमित्येतत्। तेन पात्रेणेव अपिधानभूतेन सत्यस्यैवादित्यमण्डलस्थस्य ब्रह्मणोऽपिहितम् आच्छादितं मुखं द्वारम्।तत्त्वं हे पूषन्नपावृण्वपसारय, सत्यस्य उपासनात्सत्यं धर्मो यस्य मम सोऽहं सत्यधर्मा, तस्मै मह्यमथवा यथाभूतस्य धर्मस्यानुष्ठात्रे दृष्टये तव सत्यात्मन उपलब्धये।

LIBRARY

सरलसंस्कृतव्याख्या

अयं प्रपञ्चः ईशेन व्याप्तः, परन्तु इन्द्रियाणां विषयासक्त्या तत्ज्ञातुं न शक्यते।तत्त्वानावरणार्थं प्रार्थ्यते चतुर्भिः अन्तिममन्त्रैः। एषु मन्त्रेषु सूर्यः अग्निः च स्तूयेते। एते चत्वारो मन्त्राः बृहदारण्यकेऽपि उपलभ्यन्ते। सूर्यस्तुत्यात्मकप्रार्थना एकान्तोज्ज्वला भवति।

अक्ष्यादित्यपुरुषौ सत्यात्मानौ भवतः, इत्युक्तं बृहदारण्यके-यत्तत्सत्यमसौ स आदित्यः...(V.5.2)। सत्यधर्मानुष्ठानेन जीवनं नीतवान् साधकः

आदित्यमण्डलस्थपुरुषेण ऐक्यं प्राप्तुम् अभिलषति। किन्तु हिरण्मयेन कोशेन सत्यात्मस्वरूपं आच्छादितम्। तं कोशं अपनीय ब्रह्मप्राप्तिं सुगमां कर्तुं प्रार्थयते साधकः। छान्दोग्येऽपि एतदुक्तम् (V.3.6.5)। ब्रह्मलोकप्रवेशनद्वारं भवति आदित्यः। शमादिसाधनसंपन्नाः विपश्चितः शरीरपाते एव आदित्यं प्राप्नुवन्ति। तद्द्वारा ब्रह्मलोकं प्राप्नुवन्ति।

उपनिषत्सु सगुणोपासनार्थं अनेकाः प्रतीकोपासनाः निर्दिश्यन्ते। "तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमित्युक्तम"(छा.उ.VIII.3-4) "आदित्यपुरुषं ब्रह्मेत्युपासीत" इति बृहदारण्यके, कौषीतक्यां च सुव्यक्तं प्रतिपाद्यते (बृ.उ.II.1.2, कौ-३.IV.2) य एवैष आदित्ये पुरुषः तमेव अहं ब्रह्मोपासे। तत्साहाय्यार्थं जगत्पोषकम् आदित्यमण्डलस्थपुरुषं याचते।

आत्मा स्वप्रकाशः, स च अनृतेन मायया आच्छन्न इत्यतः उपासकाः स्वस्वरूपम् आत्मानं न जानन्ति। तदुक्तम् छान्दोग्ये (VIII.3.1)। मन्त्रेऽस्मिन् हिरण्मयपात्रं इत्यनेन अनृतम् अविद्या एव उच्यते। सा तु कामिनीकाञ्चनादिभोग्यवस्तुभिः जनान् आकर्षति, एवं ते सत्यात् व्यतिक्रामन्ति। एतदेव कठोपनिषदि (II.6) उक्तम्। वित्तमोहादिरूपात् मायाचक्रात् मोक्तुं पुष्टिदायकं सर्वेश्वरं भजति। भगवद्गीतायाः विभूतियोगेऽपि प्रतीकोपासनायाः संग्रहोद्रष्टुं शक्यते। तदुक्तम्- "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इति (भगवद्गीता-VII.24)। सत्यं धर्मत्वेन स्वीकृतवान् सत्यधर्मा। ज्ञानस्वरूपं ब्रह्मैव सत्यम्। अन्वेषणेन साक्षात्कर्तुं इष्टो लक्ष्यो धर्मः। ब्रह्मदर्शनलालसः सत्यधर्मः। अतः नामरूपात्मकम् आवरणं अपावृत्य यथार्थसत्यं दर्शयितुं प्रार्थयते।

हिन्दी व्याख्या

यह प्रपंच ईश से व्याप्त है। लेकिन इन्द्रियों की विषयासक्ति से वह जाना नहीं जा सकता। तत्त्वों के अनावरण के लिए अन्तिम चार मंत्रों से प्रार्थना की जाती है। इन मंत्रों में सूर्य और अग्नि की भी स्तुति की जाती है। ये चार मंत्र बृहदारण्यकोपनिषद में भी प्राप्त होते हैं। सूर्य की स्तुति से संबन्धित प्रार्थना अत्यन्त उज्ज्वल होती है।

अक्षिपुरुष और आदित्यमण्डलस्थ पुरुष दोनों सत्यात्मा होते हैं, ऐसा बृहदारण्यकोपनिषद् में कहा गया हैं- यत्तत्सत्यमसौ सादित्यौ...। सत्यधर्म के अनुष्ठान से जीवन को चलाने वाला साधक आदित्य मण्डल में स्थित पुरुष से एकता की अभिलाषा करता है। लेकिन हिरण्मय कोश से सत्यात्म स्वरूप आच्छादित है। उस कोश को दूर छोडकर ब्रह्म-प्राप्ति को आसान करने की प्रार्थना साधक करता है। छान्दोग्योपनिषद् में भी यह कहा गया है। (V.3.6.5)। ब्रह्मलोक में प्रवेश करने का द्वार आदित्य है। शमादि साधनसंपन्न विपश्चित् शरीर के पतित होते वक्त ही आदित्य को प्राप्त करते हैं और उसके द्वारा ब्रह्मलोक को पहुँच जाते हैं।

उपनिषदें सगुणोपसनार्थ अनेक प्रतीकों की उपासनाओं का निर्देश करती हैं। "तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमित्युक्तम्।" (छा.उ. VIII-3-4)- इसे ब्रह्म कहना सत्य है। बृहदारण्यकोपनिषद् में (II-1-2) आदित्य पुरुषं ब्रह्मेत्युपासीत। आदित्यमण्डलस्थ पुरुष की ब्रह्मरूप से उपासना करो- कहा गया है। कौषीतकी उपनिषद् में इसका सुव्यक्त प्रतिपादन किया गया है- य एवैष आदित्ये पुरुषः तमेव अहं ब्रह्मोपासे। (कौ. उ. IV-2) सूर्यमंण्डल में स्थित उस पुरुष की ही ब्रह्म-बुध्या मैं उपासना करता हूँ। उस बात में सहायता के लिए जगत के पोषक सूर्यमंडलस्थ पुरुष की प्रार्थना की जाती है।

आत्मा स्वयं प्रकाशक है। वह असत्यरूप माया द्वारा आच्छन्न है। इस कारण उपासक अपने स्वरूप आत्मा को नहीं जानते। वह छान्दोग्योपनिषद् में यों बताया गया है। (VIII.3.1) इस मंत्र में प्रस्तुत "हिरणमय-पात्र" से अनृत, अविद्या ही सूचित है। वह तो कामिनी, काञ्चन आदि भोग्य वस्तुओं से लोगों को आकृष्ट करती है, इस प्रकार वे लोग सत्य से व्यतिक्रान्त हो जाते हैं। ऐसे ही कठोपनिषद् में (II-6) बताया गया है। वित्तमोह आदि रूप मायाचक्र से छूटकारा पाने के लिए पोषण-दाता सर्वेश्वर का भजन किया जाता है। भगवद्गीता के विभूतियोग में भी प्रतीकोपासना का संग्रह देखा जा सकता है। वह यों कहा गया है- "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते"। जो जन मेरी प्रपात्ति में आते हैं वे ही इस माया को पार करते हैं। सत्य को धर्मत्व के रूप में स्वीकृत व्यक्ति को ही सत्यधर्म कहते हैं। ज्ञानस्वरूप ब्रह्म ही सत्य है।

अन्वेषण से साक्षात्कार करने योग्य इष्ट लक्ष्य धर्म है। ब्रह्म के दर्शन की लालसा करने वाला सत्य धर्म होता है। अतः नामरूपात्मक आवरण का अपावरण करके यथार्थ सत्य को दिखाने की प्रार्थना की जाती है।

English Translation

The entire universe, though covered over with and indwelt by the Lord, is not known so. The senses forcibly carry away our minds towards objects of enjoyments. The true self thereby remains veiled and the last four verses here are prayers, demanding the removal of the veil. The prayer praising the sun-God also seems shining.

The person within the orb of the sun is the form of truth. Brhadaranyaka says, "Sun is He, who is truth." Holding truth as law of life, one wants to become identified with the divine soul in the orb of the sun. But that face of truth is covered by a golden disc. This verse is a prayer to the sun, to remove that golden disc so that he can easily experience the true self.

The sun is the gate way to enter the world of Brahman. Scholars reach the sun at first, as soon as the body falls down and through him, enter into the world of Brahman.

Brahman is in qualified and absolute forms. For meditation on qualified Brahman, Upanishads introduce meditation on other images of Brahman. One such meditation is on the sun-god. "Meditate on sun god as Brahman," say Brihadaranyaka and Kaushitaki upanshads. They also read as "the person who is yonder in the sun, on him, do I meditate as Brahman".

The golden disc, mentioned here is Avidya or Maya. It is that false ignorance which covers the truth. It attracts people by showing objects of enjoyment such as gold and pretty women. And by thus, people are removed away far from the truth. This is presented in katopanishad also.

In Vibhuti-yoga (tenth chapter) of Bhagavad-Gita also, it is defined. Lord says, "Who constantly adore me alone can cross the Maya."

Satyadharama is one, who has taken truth as virtue in his life. Truth is nothing but Brahman, the eternal consciousness. So this prayer, requesting sun-god to remove the cover, is to enable one be a Satyadharma, one who experiences the eternal consciousness.

श्लोकः-१६

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह तेजो यत्ते रूपं
कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि।।१६।।

हे सूर्य! एकर्षे (एक एव ऋषति गच्छतीति एकर्षिः) सर्वस्य संयमनात् यमः, तथा रश्मीनां प्राणानां रसानां च स्वीकरणात् सूर्यः, हे प्राजापत्य (प्रजापतेरपत्यं प्राजापत्यः) स्वान् रश्मीन् एकीकुरु, उपसंहरतु तेजस्तापकं ज्योतिः। तव अत्यन्तशोभनं रूपं यत् तत् भवतः अनुग्रहात् पश्यामि। योऽसौ आदित्यमण्डलस्थः पुरुषः स अहमस्मि।

हे सबके पोषक (रक्षक) पूषादेव अर्थात सूर्यदेव, हे एकर्षे (एक एव ऋषति उगच्छति उसंचार करता है अर्थात् एकाकी चलता है), सब का संयमन करने वाले यम, रश्मियों को अर्थात् प्राणों को और रसों को स्वीकार करने वाले सूर्य, एवं हे प्रजापत्य (प्रजापति के पुत्र) आप अपनी किरणों का एकीकरण कीजिए, अपने तापक तेज का उपसंहार कीजिए। आप का अनन्त शोभन रूप जो है, वह मैं आपके अनुग्रह से देख रहा हूँ। जो वह आदित्य मंडलस्थित पुरुष है, वह मैं स्वयं हूँ।

O Nourisher (Sun-God) the one mover, controller, attracter (of energies) son of prajapati, withdraw your rays and collect your spleudour. I see the most auspicious form of Thine; who is indweller (in Sun-God) He I am.

शाङ्करभाष्यम्

हे पूषन्! जगतः पोषणात्पूषा रविस्तथैक एव ऋषति गच्छति इत्येकर्षिः-हे एकर्षे! तथा सर्वस्य संयमनाद्यमः-हे यम! तथा रश्मीनां प्राणानां रसानाञ्च स्वीकरणात् सूर्यः-हे सूर्य! प्रजापतेरपत्यं प्राजापत्यः- हे प्राजापत्य! व्यूह विगमय रश्मीन्स्वान्। समूह एकीकुरु उपसंहर ते तेजस्तापकं ज्योतिः।

यत्ते तव रूपं कल्याणतमम् अत्यन्तशोभनं तत्ते तवात्मनः प्रसादात् पश्यामि। किञ्चाहं न तु त्वां भृत्यवद्याचे योऽसावादित्यमण्डलस्थो व्याहृत्यवयवः पुरुषः पुरुषाकारत्वात्पूर्णं वानेन प्राणबुद्ध्यात्मना जगत्समस्तमिति पुरुषः पुरि शयनाद्वा पुरुषः सोऽहमस्ति भवामि।

सरलसंस्कृतव्याख्या

सगुणोपासनायाः स्वरूपं लक्ष्यञ्च अतिरमणीयतया मन्त्रेऽस्मिन् वर्ण्यते। शरीरे -पुरे-शेते इति पुरुषः अथवा सर्वत्र जगति सदा पूर्णतया वर्तते इति पुरुषः। एनं पुरुषं अन्विष्यति साधकः। अहं अहं इत्येवं पुरुषास्तित्त्वं जानन्ति सर्वे। स पुरुषः प्रत्यक्षप्रमाणगोचरो न भवति, रूपाभावात्। तस्मात् मनसः स्थैर्यार्थं (एकाग्रतायै) प्रतीकस्वीकारः। "उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना" इति। ईश्वरप्रभावपूर्वकं तेजोमयं, उत्साहाधिकं च यत् किञ्चित् दृश्यमपि प्रतीकत्वेन अङ्गीकर्तुं शक्यत इति भगवद्गीतायां उक्तं विभूतियोगे। एतदनुसृत्य उत्तमप्रतीको भवति आदित्यः। आदित्यः भूलोकः, भुवर्लोकः, सुवर्लोकः इति महाव्याहृत्यवयवसहितः, प्राणबुद्ध्यात्मना लोके सर्वत्र व्याप्तः, सत्यपुरुष एव। अन्तरादित्य एव पुरुषः मयि साधके च वर्तते इति साक्षात्कृतं मया। भवतः दिव्यस्वरूपदर्शनेन मम अभेदानुभूतिः परिपूर्णा भूयादिति अत्र प्रार्थ्यते। तस्य भूरिति शिरः, भुव इति बाहुः, सुवरिति प्रतिष्ठा, पादौ इति व्याहृत्यवयवाः (बृ.उ. V.5.3)

आदित्य-अक्षिपुरुषयोः ऐक्यज्ञाने स देहनाशे (देहोत्क्रमणे) आदित्यमण्डलं शुद्धमेव पश्यति। तदुक्तं बृहदारण्यके-स यदोत्क्रमिष्यन् भवति शुद्धमेवैतन्मण्डलं पश्यति। नैनमेते रश्मयः प्रत्यायन्ति। (V.5.2) प्रार्थना, दर्शनम्, अनुभूतिः, एषां सम्मिलितरूपध्यानस्य पूर्णरूपमेव मन्त्रेऽस्मिन् प्रकाशितम्। प्रथमे पादद्वये प्रार्थना, प्रार्थनाफलञ्च, तृतीयपादे दर्शनं, दर्शनफलं च, चतुर्थे अभेदानुभूतिश्च प्रकाश्यते।

हिन्दी व्याख्या

इस मंत्र में सगुणोपसना के स्वरूप और लक्ष्य बडी रमणीयता से वर्णित किये जाते हैं। 'शरीरे-पूरे शेते इति पुरुषः'- शरीर अर्थात् पुर में शयन करने वाले को पुरुष कहा जाता है। अथवा 'सर्वत्र जगत में सदा पूर्णरूप से वर्तमान जो है वह पुरुष है। ऐसे पुरुष का अन्वेषण साधक करता है। सब लोग अहं (मैं) इस प्रकार से पुरुष के अस्तित्त्व को जानतें है। वह पुरुष किसी रूप के अभाव में प्रत्यक्ष प्रमाण केलिए गोचर नहीं होता। उस कारण मन की स्थिरता (एकाग्रता) के लिए प्रतीक को स्वीकार किया जाता है। यह कहा भी गया है

'उपासकों के कार्य के लिए ब्रह्म की रूप कल्पना की जाती है। ईश्वर-प्रभावपूर्वक तेजोमय और उत्साहाधिक जो कुछ दृश्य है वह प्रतीकरूप से स्वीकार किया जा सकता है ऐसा भगवद्गीता के विभूतियोग में कहा गया है। उसके अनुसार आदित्य उत्तम प्रतीक होता है। भूलोक, भुवर्लोक और सुवर्लोक (भूः, भुवः, सुवः) इन महाव्याहृतिरूप अवयवों से सहित होकर प्राणबुध्यात्मा आदित्य जगत में सब कहीं व्याप्त है। वही सत्य पुरुष अन्तरादित्य एव पुरुषः - अन्तरादित्य ही मुझ साधक में भी वर्तमान है यों मैं साक्षात्कृत करता हूँ। आपके दिव्य स्वरूप के दर्शन से मेरे अभेद की अनुभूति परिपूर्ण हो जाय, यों प्रार्थना की जाती है। भूः (भूलोक) उसका शीर्ष, भुवः (भुवर्लोक) उसकी बाहुएँ, सुवः (सुवर्लोक) उसकी प्रतिष्ठा (दोपाद) ये व्याहृति-अवयव हैं। (बृ.उ.V 5-3)

आदित्य एवं अक्षिपुरुष अर्थात् प्रत्यक्षपुरुष इन दोनों के ऐक्यज्ञान से देहनाश (देहोत्क्रमण) की अवस्था में आदित्यमंडल को वह शुद्ध रूप में देखता है। बृहदारण्यकोपनिषद् में ऐसा कथित है- 'स यदोत्क्रमिष्यन् भवति शुद्धमेवैतन्मंडलं पश्यति। नैनमेते रश्मयः प्रत्यायन्ति।' (V-5-2) (वह चाक्षुष पुरुष उत्क्रमण को जैसे ही आरंभ करता है, अर्थात् मृत्यु की वेला में इस मंडल को अर्थात् आदित्यमंडल को शुद्धरूप में ही देखता है) फिर ये रश्मियाँ इसके पास नहीं आतीं।) प्रार्थना, दर्शन, अनुभूति-इनके सम्मिलितरूप के ध्यान का पूर्णरूप ही इस मंत्र में प्रकाशित किया गया है। आरंभ के दो पादों में प्रार्थना और प्रार्थना का फल प्रतिपादित हैं। तीसरे पाद में दर्शन और दर्शन का फल दोनों वर्णित हैं। चतुर्थ पाद में अभेदानुभूति प्रकाशित है।

English Translation

This verse also presents the structure and aim of meditation on qualified Brahman.

'Purusha' means 'indweller' or a complete person fully present in each and everything. He cannot be perceived by the senses as He is colourless. But He is perceived by one and all, through the inner mind as 'I'. For a clear perception, concentration of mind is needed. To achieve that high-class-concentration, meditation on its images is taken.

Every being, as glorious, brilliant and powerful, is a part of manifestation of His glory, as said in Bhagavad-Gita. The sun may be the best image of Him to be considered for meditation.

The sun, with the worlds of Bhu, Bhuvah, and suvar, the elements of Mahavyahruti, is everywhere and within everyone in the form of breath and intellect. Brhadaranyaka says, "Of the person in that orb, the syllable 'Bhu' is the head, 'Bhuva' is the arms, and suvar is the feet". The person in the orb of the sun is purusha and who purusha within there, is, He I am. This experience of identity is the purpose of the prayer.

Once, this experience of identity is achieved, the pure orb of the sun can be perceived during the time of death. Brhadaranyaka says- "when one is about to depart, he see, that orb as clear; those says no more come to him".

Prayer, perception, and experience are the different stages of meditation, as presented in this verse. The first half is prayer and request and the second half mentions perception and experience of identity.

श्लोकः-१७

वायुरनिलममृतमथेदं भस्मान्तं शरीरम्।
ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर।।१७।।

प्राणः अमृतं सूत्रात्मानं प्रतिपद्यताम्। अथ इदं स्थूलशरीरं अग्नौ हुतं भवेत्। अक्षरब्रह्मणः प्रतीकात्मकं प्रणवं (ओङ्कारं) स्मर हे मनः। एतावन्तं कालं त्वया अनुष्ठितं सत्कर्म, तच्च स्मर। क्रतो स्मर. कृतं स्मर इति पुनर्वचनं आदरार्थम्।

मेरे प्राण अमृत सूत्रात्मा को प्राप्त हों और यह मेरा स्थूलशरीर अग्नि में आहुत हो जाय। हे मन, तू ब्रह्म के प्रतीकात्मक प्रणव (ओंकार) का स्मरण कर। इस काल तक तेरे द्वारा अनुष्ठित सत् कर्मों का भी स्मरण कर। क्रतो (संकल्पात्मक मन) स्मर अर्थात् स्मरण कर। कृतं (किये हुए सत्कर्मों का) स्मर अर्थात् स्मरण कर। इन पंक्तियों को दुहराना आदर सूचना के लिए है।

Let the breath resolve into the immortal air and the body be reduced to ashes. O fire, remember the deeds, remember.

शाङ्करभाष्यम्

अथेदानीं मम मरिष्यतो वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वाधिदैवतात्मानं सर्वात्मकमनिलममृतं सूत्रात्मानं प्रतिपद्यतामिति वाक्यशेषः। लिङ्गं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यम्, मार्गयाचनसामर्थ्यात्। अथेदं शरीरमग्नौ हुतं भस्मान्तं भूयात्।

ओमिति यथोपासनम् ॐ प्रतीकात्मकत्वात्सत्यात्मकमग्न्याख्यं ब्रह्मदेवेनोच्यते। हे क्रतो! सङ्कल्पात्मक! स्मर यन्मम स्मर्तव्यं तस्य कालोऽयं प्रत्युपस्थितोऽतः स्मर। एतावन्तं कालं भावितं कृतमग्रे स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर। क्रतो स्मर कृतं स्मरेति पुनर्वचनमादरार्थम्।

सरलसंस्कृतव्याख्या

देवतोपसनायां, विहितकर्मसु, च व्यापृतस्य साधकस्य मृतिकालिकप्रार्थना भवति इदं मन्त्रम्। अहं ममेति अभिमानभाजो मम देहस्थः प्राणवायुः, उपाधिरहिते विराट्पुरुषे, सर्वगते सर्वात्मनि सूत्रात्मनि ऐक्यं प्राप्नोतु। ततः भौतिकमिदं स्थूलशरीरं भस्मीकृतं पञ्चभूतेषु लयं प्राप्नोतु। ज्ञानकर्मभिः संस्कृतं लिङ्गशरीरमपि सत्यात्मनि लयं प्राप्नोतु।

जीवन्मुक्तिं अलभमानः (अप्राप्तः) मरणकाले ब्रह्मप्रतीकं प्रणवं स्मृत्वा कर्मविमुक्तिमिच्छति। सः क्रममुक्तिं लभते। क्रममुक्तिमार्ग एव उत्तरायणमार्गः। भगवद्गीतायां अयमाशयः सुव्यक्तं प्रकाशितः, यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति कौन्तेय सदा तद्भावभावितः।। (VIII.6)

तत्रैव ओमित्येकाक्षरं ब्रह्म व्यावहरन्मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्।। (VIII.13)

क्रममुक्त्यर्हस्य पुनः संसारो न, स दिव्यलोकानतिक्रम्य क्रमेण ब्रह्मप्राप्तो भवति। एषः क्रममुक्तिः। प्रणवं स्मृत्वा क्रममुक्तिं प्राप्तुं उपदिशति श्रुतिः। क्रतो स्मर, कृतं स्मर इत्यावर्तनं प्रणवादरार्थम्। अयं प्रणवध्यानस्य अवश्यकर्तव्यतां स्मारयति। अत्र सङ्कल्पात्मकं मनः अस्मिन् जीवने कृतानि उपासनादिसत्कर्माणि स्मृत्वा तदनुरूपं उत्कृष्टगतिं दातुं प्रार्थ्यते।

हिन्दी व्याख्या

यह मंत्र देवता की उपासना और विहितकर्मों में व्याप्त रहे, साधक द्वारा मृतिकाल के आसन्न होने पर की जाने वाली प्रार्थना है। मैं मेरे का अभिमान करने वाली मेरी देह में स्थित प्राण-वायु उपाधिरहित, सर्वगत, सर्वात्मा विराट पुरुष और सूत्रात्मा में ऐक्य प्राप्त करे। उसके बाद यह भौतिक स्थूल शरीर भस्म होकर पञ्चभूत में लय प्राप्त करे। ज्ञान और कर्मों से संस्कृत लिंग शरीर भी सत्यात्मा में लय प्राप्त करे।

जीवनमुक्ति को अप्राप्त, मरणकाल में ब्रह्म के प्रतीक प्रणव का स्मरण करके कर्म की विमुक्ति को चाहता है। वह क्रम मुक्ति को प्राप्त करता है। क्रम मुक्ति का मार्ग भी उत्तरायणमार्ग है। भगवद्गीता में यह आशय सुव्यक्तरूप से प्रतिपादित है।

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भाव भावितः।। (गी. VIII-6)

(हे अर्जुन, जो व्यक्ति अन्त्य काल में जिस जिस वस्तु का स्मरण करके शरीर छोडता है वह (अगले जन्म में) उस उस वस्तु को ही प्राप्त करता है।)

पुनश्च-

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्।। (गी. VIII-13)

(ओं रूप के एकाक्षर का उच्चारण करते हुए और (उसके अर्थवाले) ब्रह्म स्वरूप मेरा अनुसरण करते हुए जो शरीर को छोडता हो, वह परम गति को प्राप्त करता है) क्रम मुक्ति को पाने वाले का फिर संसार में आना नहीं होता, वह दिव्य लोकों का अतिक्रमण करके क्रमशः ब्रह्मप्राप्ति को उपलब्ध करेगा। वही क्रममुक्ति का स्वरूप है। प्रणव का स्मरण करके क्रममुक्ति को प्राप्त करने का उपदेश देती है श्रुति। प्रणव के प्रति आदरभाव को सूचित करने के लिए 'क्रतो स्मर' (संकल्प स्वरूपी मन, तू स्मरण कर), कृतं स्मर (तू अपने किये अच्छे कार्यों का स्मरण कर) का आवर्त्तन किया जाता है। यहाँ प्रणवध्यान की अवश्यकर्तव्यता का स्मरण कराया जाता है। यहाँ पर संकल्पात्मक मन इस जीवन में कृत उपासना जैसे सत्कर्मों का स्मरण करके उसके अनुरूप उत्कृष्ट गति को प्रदान करने की प्रार्थना की जाती है।

English Translation

This verse is addressed at the time of death by a man, engaged in sacrificial works and meditation on gods; He prays, "Let my air (or breath) resolve into the universal prana or soul since my individuality is dissolved; and let the body be consumed by fire and get absorbed within five bhutas (five elements of nature)".

'Jeevan-Mukti' is partial liberation, even during the period of living. Such liberated people directly get the real liberation, soon after that life-course. Others meditate on omkara, the image of Brahma and attain gradual liberation. The path of gradual liberation is uttarayana-path.

"Thinking of whatever entity, one leaves his body at last that alone he attains, being ever absorbed in its thought. He, who leaves the body and departs uttering 'om' and dwelling on me, reaches the supreme goal."

One who departs for gradual liberation, never returns back to this world of endoge; he gradually attains Brahma.

Here, Omkara is chanted to denote the importance of meditation on it. The next passage is repeated once again to show its significance. The prayer to Agni is to remind him that the dying man by virtue of sacrificial works done by him merits the good path.

श्लोकः-१८

अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नम उक्तिं विधेम।।१८।।

हे अग्निदेव! सर्वाणि विश्वानि, कर्माणि, प्रश्नानि जानन् त्वं अस्मान् धनाय (कर्मफलभोगाय) शोभनेन पथा गमय। अस्मत् कुटिलं (वञ्चनात्मकं) पापं वियोजय (विनाशय), ते बहुतरां नमस्कारवचनं-नमस्कारं कुर्याम इत्यर्थः।

हे अग्निदेव, सारे कर्मों और ज्ञानों को समझ लेने वाले आप हमें (मुझे) कर्मफलों के उपभोग के लिए शोभन मार्गों से चलाइए। मुझ से कुटिल कर्मों या पापों को निकाल कर हटा (नष्टकर) दीजिए। आप के लिए बहुत नमस्कार-वचनों को अर्थात् नमस्कारों को कर रहा हूँ।

O Agni, lead us by Good path, for the sake of our wealth. You know all our actions and thoughts. Destroy our crooked sins. We offer Thee the best words of salutations.

शाङ्करभाष्यम्

पुनरन्येन मन्त्रेण मार्गं याचते।

हे अग्ने! नय गमनं सुपथा शोभनेन मार्गेण। सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम्। निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेनातो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन पथा नय। राये धनाय कर्मफलभोगायेत्यर्थः, अस्मान्यथोक्तधर्मफलविशिष्टान् विश्वानि सर्वाणि हे देव! वयुनानि कर्माणि प्रज्ञानानि वा विद्वाञ्जानन्।

किञ्च युयोधि वियोजय विनाशय; अस्मदस्मत्तो; जुहुराणं कुटिलं; वञ्चनात्मकमेनः पापम्। ततो वयं विशुद्धाः सन्त इष्टं प्राप्स्याम इत्यभिप्रायः। किन्तु वयमिदानीं ते न शक्नुमः परिचर्यां कर्तुम्। भूयिष्ठां बहुतरां ते तुभ्यं; नम उक्तिं नमस्कारवचनं; विधेम नमस्कारेण परिचरेम इत्यर्थः।

अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते। (ई.उ.११) विनाशेन मृत्युं तीर्त्वासम्भूत्यामृतमश्नुते (ई.उ.१४) इति श्रुत्वा केचित्संशयं कुर्वन्ति।

अतस्तन्निराकरणार्थं संक्षेपतो विचारणां करिष्यामः।

तत्र तावत्किन्निमित्तः संशय इत्युच्यते।

विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यतेऽमृतत्त्वञ्च।

ननूक्तायाः परमात्मविद्यायाः कर्मणश्च विरोधात्समुच्चयानुपपत्तिः।

सत्यम्। विरोधस्तु नावगम्यते विरोधाविरोधयोः शास्त्रप्रमाणकत्वात्। यथाविद्यानुष्ठानं विद्योपासनञ्च शास्त्रप्रमाणकं तथा च न हिंस्यात्सर्वा भूतानीति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यतेऽध्वरे पशुं हिंस्यादिति। एवं विद्याविद्ययोरपि स्यात्। विद्याकर्मणोश्च समुच्चयः।

न दूरमेते विपरीते विषूची अविद्या या च विद्या (क.उ.१।२।४) इति श्रुतेः।

विद्यां चाविद्यां चेति वचनादविरोध इति चेत्?

न; हेतुस्वरूपफलविरोधात्।

विद्याविद्याविरोधाविरोधयोर्विकल्पासम्भवात्समुच्चयविधानादविरोध एवेति चेत्?

न; सहसम्भवानुपपत्तेः।

क्रमेणैकाश्रये स्यातां विद्याविद्ये इति चेत्?

न; विद्योत्पत्तौ अविद्यायाह्यस्तत्त्वात्तदाश्रयेऽविद्यानुपपत्तेः। न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेवाश्रये शीतोऽग्निरप्रकाशो वेत्यविद्याया उत्पत्तिर्नापि संशयोऽज्ञानं वा यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः (ई.उ.७) इति शोकमोहाद्यसम्भवश्रुतेः। अविद्यासम्भवात्तदुपादानस्य कर्मणोऽप्यनुपपत्तिम् अवोचाम।

अमृतमश्नुत इत्यापेक्षिकम् अमृतम्। विद्याशब्देन परमात्मविद्याग्रहणे हिरण्मयेनेत्यादिना द्वारमार्गादियाचनमनुपपन्नं स्यात्। तस्मादुपासनया समुच्चयो न परमात्मविज्ञानेनेति यथास्माभिव्यर्थाख्यात एव मन्त्राणामर्थ इत्युपरम्यते।

सरलसंस्कृतव्याख्या

पुनः अन्येन मन्त्रेण मार्गं याचते। मरणोन्मुखस्य योगिनः अन्तिमप्रार्थना

भवत्ययं मन्त्रः। अत्र ब्रह्मप्रतीको भवत्ययम् अग्निः। सकामनिष्कामरूपेण तमग्निं प्रार्थयितुं शक्यम्। एतादृशप्रार्थनया मरणानन्तरं द्वे गती निर्दिश्येते। तदुक्तं भगवद्गीतायां-

अग्निर्ज्योतिरिहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः।।
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते।। (VIII 24-25)

दक्षिणायनं उत पितृयानं वा धूममार्गः, उत्तरायणं अथवा देवयानम् एव अर्चिमार्ग इत्युच्यते। अग्निं सकामं प्रार्थयतः साधकस्य पितृलोकप्राप्तिः। किन्तु पुण्यक्षये सति पुनः संसारे आविर्भवति। “क्षीणे पुण्ये मर्त्यलोकं विशन्ति” इति। निष्कामप्रार्थनया कर्मवासनाक्षयात् क्रममुक्त्यर्हो भवति। एष उत्तरायणमार्गः। क्रममुक्तेः मार्गो भवति इत्यतः अयं मार्गः सुपथ इति गम्यते।

हिन्दी व्याख्या

फिर और एक मंत्र द्वारा मार्ग की याचना की जाती है। यह मंत्र मरणोन्मुख योगी की अन्तिम प्रार्थना है। यहाँ की अग्नि ब्रह्म का प्रतीक है। सकाम तथा निष्काम रूप से उस अग्नि की प्रार्थना की जा सकती है। ऐसी प्रार्थना से मृत्यु के बाद दो गतियाँ प्राप्त की जा सकती हैं ऐसा उपदेश किया गया है। वह भगवदगीता में यो बताया गया है-

अग्निर्ज्योतिरिहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः।।
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते।। (गी. VIII 24-25)

(पंचाग्नि विद्या द्वारा प्रणवोपासना करने वाले मृत्यु को प्राप्त करने पर) अग्नि, ज्योति, दिन, शुक्लपक्ष छेमास वाला उत्तरायण-इनके (अधिदेवताओं के स्थानों के) पथ से जाने वाले ब्रह्म को प्राप्त करते हैं। ये ब्रह्मज्ञानी हैं। (उस स्थान से उनका लौटना नहीं होता।) वैसे ही प्रणवोपासना करने वाले कर्मयोगी धूम, रात्रि कृष्णपक्ष और छहमास वाला दक्षिणायन-इनके (अधिदेवताओं के स्थानों के) मार्ग से चन्द्रमा को प्राप्त करके (उस स्थान को सुखों को भोगने के बाद) इसी संसार में लौट आते हैं।)

दक्षिणायन पितृयान होता है। वह धूममार्ग है। उत्तरायण देवयान है, वह अर्चि मार्ग कहलाता है। अग्नि की सकामोपासना करने वाला साधक पितृलोक को प्राप्त करता है। किन्तु ऐसे लोग पुण्य का क्षय हो जाने पर पुनः संसार में ही वापस आते हैं। कहा भी गया है- “क्षीणे पुण्ये मर्त्यलोकं विशन्ति”। निष्काम प्रार्थना से कर्म वासना का क्षय हो जाने पर क्रममुक्ति की योग्यता हासिल होती है। यह उत्तरायण मार्ग है। क्रममुक्ति का मार्ग होने पर यह मार्ग “सुपथ” ऐसा समझा जाता है।

English Translation

This verse is the last prayer of a man, who has achieved meditation, addressed during death. The prayer is for Agni (fire-god) who is the image of Brahman. Two paths are referred in Bhagavad-Gita for people after death. One is that, in which are stationed the fire-god, and the deities presiding over the day time, the bright fortnight and the six months of Uttarayanam. Proceeding along it after death, people who have experienced Brahman, finally reach Brahman, from where, there is no return. The other path is that wherein are stationed the gods presiding over smoke, night, the dark fortnight and the six months of Daksinayanam. Taking this path after death, after attaining the lusture of the moon, Yogi returns to this mortal world. The former is called Devayana (path of gods) or Archirmarga (path of fire-god). The latter is called pithryana (path of ancestors) or Dhuma marga (path of smoke).

Those who enter into the second path, return to this human world, once the merit of good-works is exhausted. But by desireless prayer and meditation, one becomes qualified for gradual liberation, takes the path of gods and

never returns back. That is why; this is called 'supatha' (good-path)

इति श्रीमच्छङ्कराचार्यविरचितम् ईशावास्योपनिषद्भाष्यं समाप्तम्।

109370

उपयुक्तग्रन्थसूची

ईशावास्योपनिषत्।
उपनिषत्स्वाध्यायम्। (मलयालम्), प्रफसर्. जी. बालकृष्णन् नायर्।
कठोपनिषत्।
कैवल्योपनिषत्।
छान्दोग्योपनिषत्।
तत्वमसि। (मलयालम्), डोक्टर्. सुकुमार् अषीक्कोड्।
तैत्तिरीयोपनिषत्।
बृहदारण्यकोपनिषत्। (बृ.उ.)
भगवद्गीता।
महानारायणीयोपनिषत्।
माण्डूक्यकारिका।
विवेकचूडामणि।
श्वेताश्वतरोपनिषत्। (श्वे.उ)